

॥ ॐ तत् सत् ॥

# अथ देवतार्चनविधिः

ಇದರಲ್ಲಿ ಬ್ರಹ್ಮಯಜ್ಞ, ದೇವರ್ಷಿಪಿತೃತರ್ಪಣ,
ವೈಶ್ವದೇವ ಸಹ ಸೇರಿರುವುದು.

ಈ ಪುಸ್ತಕವು

ಶ್ರೀಮಚ್ಚಿತ್ರಾಪುರ ಮಠದ

ಶ್ರೀಮತ್ಪರಮಹಂಸೇತ್ಯಾದಿ ಬಿರುದಾಂಕಿತ

**ಶ್ರೀಮತ್ಪಾಂಡುರಂಗಾಶ್ರಮ ಶ್ರೀಸ್ವಾಮಿಗಳವರಿಂದ**

ಶಿಷ್ಯಜನರ ನಿತ್ಯೋಪಯೋಗಾರ್ಥವಾಗಿ ಸಂಕಲಿಸಿ

ಪರಿಶೋಧಿಸಲ್ಪಟ್ಟದ್ದು

**ಶ್ರೀಮತ್ ಆನಂದಾಶ್ರಮಾನುಗ್ರಹೀತ**
**ಶ್ರೀಮತ್ ಪರಿಜ್ಞಾನಾಶ್ರಮ**
**ಶ್ರೀಗೌಡಪೂಜ್ಯಪಾದಂಗಳವರಿಂದ**

ಪ್ರಕಾಶಿಸಲ್ಪಟ್ಟಿತು.

ನಾಲ್ಕನೇ ಆವೃತ್ತಿ ೩೦೦೦ ಪ್ರತಿಗಳು

1969



॥ ॐ तत् सत् ॥

# अथ देवतार्चनविधिः

ಇದರಲ್ಲಿ ಬ್ರಹ್ಮಯಜ್ಞ, ದೇವರ್ಷಿಪಿತೃತರ್ಪಣ,
ವೈಶ್ವದೇವ ಸಹ ಸೇರಿರುವುದು.

ಈ ಪುಸ್ತಕವು

ಶ್ರೀಮಚ್ಚಿತ್ರಾಪುರ ಮಠದ

ಶ್ರೀಮತ್ಪರಮಹಂಸೇತ್ಯಾದಿ ಬಿರುದಾಂಕಿತ

**ಶ್ರೀಮತ್ಪಾಂಡುರಂಗಾಶ್ರಮ ಶ್ರೀಸ್ವಾಮಿಗಳವರಿಂದ**

ಶಿಷ್ಯಜನರ ನಿತ್ಯೋಪಯೋಗಾರ್ಥವಾಗಿ ಸಂಕಲಿಸಿ

ಪರಿಶೋಧಿಸಲ್ಪಟ್ಟಿದ್ದು

**ಶ್ರೀಮತ್ ಆನಂದಾಶ್ರಮಾನುಗ್ರಹೀತ**
**ಶ್ರೀಮತ್ ಪರಿಜ್ಞಾನಾಶ್ರಮ**
**ಶ್ರೀಗೌಡಪೂಜ್ಯಪಾದಂಗಳವರಿಂದ**
ಪ್ರಕಾಶಿಸಲ್ಪಟ್ಟಿತು.

ನಾಲ್ಕನೇ ಆವೃತ್ತಿ ೩೦೦೦ ಪ್ರತಿಗಳು

1969

**Price : 50 Paise**

Printed by J. M. Pangerkar at Harivijay Printing Press, Gaiwadi, Bombay-4 and Published by the Manager, Shri Chitrapur Math, Shirali, (North Kanara).

# —: शुद्धपत्रिका :—

| पृष्ठं | पंक्ति | अशुद्धं | शुद्धं |
|---|---|---|---|
| ३ | १२ | ॐ | ॐ |
| ३ | २२ | गर्भाभ्या | गर्भाभ्यां |
| ५ | १२ | वहातिच | वहेतिच |
| ५ | २० | पश्यन् | पश्यन् |
| ६ | २ | धृतिः | धृतिः |
| ६ | १५ | पांचजन्यो | पांचजन्यः |
| ८ | १ | स्तिष्ठंतु | स्तिष्ठंतु ॥ |
| ८ | ११ | चक्षुषि | चक्षुषि |
| ९ | ३ | हृदयंमयि | हृदयंमयि |
| ९ | ३ | ममृते | ममृते |
| १० | १ | चेतस | चेतसः |
| १० | ७ | नमाः | नमः |
| १२ | १ | पंत्क्य | पंत्कय |
| १२ | ६ | जिनः | जिनः । |
| १३ | ७ | नंतर | नंतरं |
| १३ | ९ | भवे० स्वमां | भवे० स्वमां |
| १३ | १८ | ज्येष्ठाय | ज्येष्ठाय |
| १३ | १८ | श्रेष्ठाय रुद्राय | श्रेष्ठाय रुद्राय |
| १४ | १८ | हेम | हेम |
| १५ | ८ | ब्रह्माधि | ब्रह्माधि |
| १६ | १० | घृत | घृत |
| १६ | १४ | धन्वने | धन्वने |
| १६ | १७ | गिरिशं | गिरिशं |
| १६ | २१ | अही | अही |
| १७ | ४ | इषवः- | इषवः— |
| १८ | ९ | जिधा | जिघा |
| १९ | ५ | नमः- | नमः- |
| २० | १२ | नमो- | नमो- |
| २० | १३ | मेध्या | मेध्या |
| २० | १५ | नमस्ताम्राय चारुणाय | नमस्ताम्राय चारुणाय |
| २२ | ८ | रुद्रास्त- | रुद्रास्त- |
| २३ | ६ | येपृ | येपृ |
| २३ | १२ | यनमः | यनमः । |
| २३ | १३ | ज्येष्ठाय नमः | ज्येष्ठाय नमः |
| २३ | १३ | श्रेष्ठाय नमो रुद्राय | श्रेष्ठाय नमो रुद्राय |
| २३ | १३ | कालाय | कालाय |
| २३ | १४ | य० य० य० य० | य० य० य० य० |
| २३ | १५ | घोरघोर- | घोरघोर- |
| २३ | १७ | दयात् | दयात् । |

| पृष्ठं | पंक्ति | अशुद्धं | शुद्धं |
|---|---|---|---|
| २४ | ४ | रेतं | रेतं |
| २४ | ४ | विश्वरूपाय- | विश्वरूपाय- |
| २४ | १० | तेब्रवीमि | तेब्रवीमि |
| २४ | १५ | वृषभं | वृषभं |
| २४ | १६ | महम् | महम् |
| २४ | १८ | मोषी | मोषीः |
| २५ | १ | कंमान | कंमान |
| २५ | १८ | चमेश | चमेश |
| २७ | १० | श्रमे- | श्रमे- |
| २८ | १ | भ्यश्रमे | भ्यश्रमे |
| २८ | १२ | मेघ | मेध |
| २९ | ५ | कल्पतां | कल्पतां |
| ३१ | १० | वर्तत । | वर्तत । |
| ३२ | ५ | रोजाम | रोजाम |
| ३२ | ८ | ज्जुहन् | ज्जुह्नन् |
| ३२ | ११ | हंसः | हंसः |
| ३२ | १४ | स्त्रजाम् | स्त्रजाम् |
| ३३ | १७ | आद्रां | आर्द्रां |
| ३४ | ६ | पद्माक्षी | पद्माक्षी |
| ३५ | २ | देविदेवता | देवता |
| ३५ | १४ | पंतये | पंतये |
| ३५ | १७ | ब्रह्मणे | ब्रह्मणे |

| पृष्ठं | पंक्ति | अशुद्धं | शुद्धं |
|---|---|---|---|
| ३६ | १३ | अर्चंत | अर्चंत । |
| ४४ | १३ | सुनुवा | सुनवा |
| ४५ | ४ | कुमारीं | कुमारिं |
| ४७ | १२ | छंदः | श्छंदः |
| ४९ | ९ | शुःरजः | शुरजः |
| ४९ | १२ | स्तारक | स्तारकः |
| ५३ | २१ | चंद्रमा | चंद्रमा |
| ५४ | १ | पार्श्वद्वया | पार्श्वद्वयो |
| ५४ | ६ | गर्भं | गर्भ |
| ५४ | १७ | भूमिं | भूमीं |
| ५७ | ७ | ऋषिः | ऋषिः |
| ५८ | ४ | तवेत्त | तवेत |
| ५८ | १४ | श ँसो | श ँसो |
| ५९ | ५ | यज्ञंपतये | यज्ञपतये |
| ५९ | ७ | ब्रह्मणे | ब्रह्मणे |
| ५९ | १० | वृश्रमे | वृश्रमे |
| ६० | ४ | माध्यमा | माध्यमा |
| | | स्तृप्यतु | स्तृप्यंतु |
| ६१ | २० | दमुंना | दमूंना |
| ६२ | १३ | वामे | वामै |
| ६२ | १९ | सपर्ययामि | समर्पयामि |
| ६३ | २२ | श्रद्धां | श्रद्धां |

# अथ देवतार्चनप्रारंभः

**श्रीमन्महागणपतये नमः ॥ श्रीगुरुभ्यो नमः ॥ श्रीभवानी-शंकराय नमः ॥ अथ देवतार्चनप्रारंभः ॥**

आचम्य प्राणानायम्य देशकालौ संकीर्त्य मम कायिकवाचिकमानसिकज्ञाताज्ञात समस्त पापक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं पञ्चायतनपूजां करिष्ये ॥ इति संकल्प्य ॥

**नादशब्दमयीं घंटां सर्वविघ्नापहारिणीम् ॥ पूजयेदस्त्रमंत्रेण देवस्य प्रीतिकारणात् ॥**

अस्त्रमंत्रेण घंटां संपूज्य ॥

**आगमार्थं तु देवानां गमनार्थं तु रक्षसाम् ॥ कुर्याद्घंटारवं नित्यं देवताव्हानलक्षणम् ॥**

इति घंटांवादयन् ॥ ततो भूशुद्धिं भूतशुद्धिं च कुर्यात् ॥

**वराहऋषिः ॥ देवीगायत्रीच्छंदः ॥ भूदेवी देवता ॥ लां बीजं ॥ लीं शक्तिः ॥ लूं कीलकम् ॥**

मम देवतार्चनाधिकारसिध्यर्थें जपे विनियोगः ॥

**लां हृदयाय नमः ॥ लीं शिरसे स्वाहा ॥ लूं शिखायै वषट् ॥ लैं कवचायहूं ॥ लौं नेत्रत्रयाय वौषट् ॥ लः अस्त्रायफट् ॥**

## ॥ ध्या न म् ॥

**विष्णुशक्तिसमुत्पन्ने स्वर्णवर्णेमहीतले ॥ अनेकरत्नसंपन्ने भूमिदेवि नमोऽस्तु ते ॥**

इति भूमिं प्रार्थ्य ॥

अपसर्पंतु ते भूता ये भूता भुवि संस्थिताः ॥ ये भूता विघ्नकर्तारस्ते नश्यंतु शिवाज्ञया ॥

इति वामपादतलेन भूमिं त्रिरास्फालयेत् ॥

सार्धतालत्रयेणैव भूतमुच्चाटयेद्बुधः ॥

ॐ असुरांतक त्रिशूलायफट् ॥

इति मंत्रेण सर्वासु दिक्षु नाराचमुद्रां त्रिशूलमुद्रां वा दर्शयेत् ॥ इति भूशुद्धिः ॥

पृथ्वीतिमंत्रस्य मेरुपृष्ठऋषिः सुतलंछंदः आदिकूर्मोदेवता आसने विनियोगः ॥ ॐ पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता ॥ त्वं च धारय मां देवि पवित्रं कुरुचासनम् ॥

इति संप्रार्थ्य ॥ आसने उपविश्य ॥

अग्निनाग्निरिति मंत्रस्य काण्वो मेधातिथिऋषिः अग्निर्देवता गायत्रीच्छंदः दीपप्रज्वालने विनियोगः ॥

ॐ अग्निनाग्निः समिध्यते कविर्गृहपतिर्युवा ॥ हव्यवाड्जुह्वास्यः ॥

इति दीपं प्रज्वाल्य ॥ गंधाद्यैः पंचोपचारान् दत्वा ॥

अस्मिन्क्षेत्रे दीपनाथ निर्विघ्नसिद्धिहेतवे ॥ भवानीपतिपूजार्थमनुज्ञां दीयतां मम ॥

इति संप्रार्थ्य ॥ ततो रेचकपूरककुंभकक्रमेण प्राणानायम्य ॥

ॐ हृदंबुजे कर्णिकमध्यसंस्थं सिंहासने संस्थितदिव्यमूर्तिम् ॥ ध्यायेद्गुरुं चंद्रशिलाप्रकाशं चित्पुस्तकाभीष्टवरं दधानम् ॥

करिष्यमाणपूजाकर्मणि अविघ्नतासिध्यर्थं श्रीमहागणपतिप्रार्थनां करिष्ये ॥

सुमुखश्चैकदंतश्च कपिलो गजकर्णकः ।। लंबोदरश्च विकटो विघ्नराजो गणाधिपः ।। धूमकेतुर्गणाध्यक्षो भालचंद्रो गजाननः ।। द्वादशैतानि नामानि यः पठेच्छृणुयादपि ।। विद्यारंभे विवाहे च प्रवेशे निर्गमे तथा ।। संग्रामे शुभकार्येषु विघ्नस्तस्य न जायते ।। शुक्लांबरधरं देवं शशिवर्णं चतुर्भुजम् ।। प्रसन्नवदनं ध्यायेत्सर्व विघ्नोपशांतये ।। सर्वमंगलमांगल्ये शिवे सर्वार्थसाधिके ।। शरण्ये त्र्यंबके गौरि नारायणि नमोऽस्तु ते ।। सर्वदा सर्व-कार्येषु नास्ति तेषाममंगलम् ।। येषां हृदिस्थो भगवान् मंगला-यतनो हरिः ।। ॐ श्रीलक्ष्मीनारायणाभ्यां नमः ।। *ॐ ब्रह्मा-सरस्वतीभ्यां नमः ।। ॐ उमामहेश्वराभ्यां नमः ।। ॐ शची-पुरंदराभ्यां नमः ।। ॐ मातापितृभ्यां नमः ।। ॐ इष्टदेवताभ्यो नमः ।। ॐ कुलदेवताभ्यो नमः ।। ॐ ग्रामदेवताभ्यो नमः ।। ॐ सर्वेभ्यो देवेभ्यो नमः ।। ॐ सर्वेभ्यो ब्राह्मणेभ्यो नमः ।।

**करिष्यमाणपूजांगत्वेन ।। कलशाराधनं करिष्ये ।।**

अग्रोदकस्य कलशमस्त्रेण क्षालयेद्बहिः ।। अंतः कवचमंत्रेण हृन्मंत्रेण प्रपूरयेत् ।। मूलेन गालिनी मुद्राममृतीकरणं तथा ।। निर्विषीकरणं धेनु-मुद्रां चापि प्रदर्शयेत् ।। गायत्र्या दशवारेण अभिमंत्र्य जलं सुधीः ।। अस्त्रा-यनम इति कलशं बहिः ।। कवचायनम इत्यंतः प्रक्षाळ्य ।। मूलेन कलश-मधोमुखं न्यस्य प्रणवेन धूपयित्वा ।। पुनर्मूलेनोत्तानीकृत्य ।। कलशोपरि वस्त्रमाच्छाद्य ।। ॐ हृदयाय नमः ।। इत्युदकमापूर्य ।। आधारे स्थापयित्वा शुध्यर्थं गालिन्यादि मुद्राः प्रदर्श्य ।। गायत्र्या अभिमंत्र्य ।।

---

* ॐ वाणी हिरण्यगर्भाभ्या नमः ।। [ पाठभेदः ]

गंगे च यमुने चैव गोदावरि सरस्वति ॥ नर्मदे सिंधु-कावेरि जलेस्मिन्सन्निधिं कुरु ॥ गंगागोदावरीकृष्णाप्रयागा-द्वारकासह ॥ आवाह्य पंचगंगाश्च सर्वपापहराश्शुभाः ॥ इमंमे गंगेत्यस्य मंत्रस्य ॥ सिंधुक्षिप्रमेधातिथिऋषिः ॥ सर्वा-नद्योदेवता ॥ जगतीच्छंदः ॥ गंगावाहने विनियोगः ॥

ॐ इमंमेंगंगेयमुनेसरस्वतिशुतुंद्रिस्तोमंसचतापरुष्ण्या ॥ असिक्न्यामरुद्वृधेवितस्तयार्जीकीयेशृणुह्यासुषोमया ॥ सितासिते-सरितेयत्रसंगथेतत्राप्लुतासोदिवमुत्पतंति ॥ ये वैं तन्वंश्विसृजंतिधीरा-स्तेजनासोअमृतत्वंभजंते ॥

कलशदेवताभ्यो नमः ॥ ध्यानाद्युपचारान् समर्पयामि ॥

ॐ आकलशेषुधावतिपवित्रेपरिषिच्यते ॥ उक्थैर्यज्ञेषुवर्धते ॥ मंत्रपुष्पं समर्पयामि ॥

पुष्कराद्यानि तीर्थानि गंगाद्यास्सरितस्तथा ॥ आगच्छं तु पवित्राणि पूजाकाले सदा मम ॥ सितमकरनिषण्णां शुभ्रवर्णां त्रिनेत्राम् करधृतकलशोद्यत्सोत्पलाभीत्यभीष्टाम् ॥ विधि-हरिहररूपां सेंदुकोटीरचूडां कलितसितदुकूलां जाह्नवीं तां नमामि ॥

इति प्रार्थयित्वा ॥ इति कलशार्चनम् ॥

## ॥ शंखार्चनम् करिष्ये ॥

त्रैलोक्यां यानि तीर्थानि वासुदेवस्यचाज्ञया ॥ शंखे तिष्ठंति विप्रेंद्र तस्माच्छंखं प्रपूजयेत् ॥ स्ववामाग्रेतु षट्कोणं वृत्तभूपुर-वेष्टितम् ॥ कृत्वा त्रिकोणमूर्ध्वाग्रं स्तंभयेच्छंखमुद्रया ॥

प्रणवेन मंडले गंधपुष्पाक्षतैरभ्यर्च्य ॥

ॐ अस्त्राय नमः ॥

इत्याधारसहितं शंखंबहिःप्रक्षाल्य ॥

ॐ कवचाय नमः ॥

इत्यंतः प्रक्षाल्य, त्रिकोणाकारमंडले पीठं प्रतिष्ठाप्य ॥

ॐ शंखाधारं त्रिपादं त्रिवलयविलसद्वासुकीमूर्तिरूपं ॥ वृत्ताकारं द्विनेत्रं लसितमुखवरं दिव्यवेदाग्निपादम् ॥ आग्नेयानन्तरूपं त्रिभुवननिलयं गंधपुष्पादिपूज्यम् ॥ तन्मध्ये कंबुपूर्वं स्मरतु गुरुवरश्चंद्रसूर्याग्निरूपम् ॥

इत्याधारं ध्यात्वा ॥ ततः अग्निकलामावाहयेत् ॥ शंखे जलमापूर्य ॥

मं वह्निमंडलाय धर्मप्रद दशकलात्मने नमः ॥ धूम्रार्चिरुष्मा ज्वलिनी ज्वालिनी विस्फुलिंगिनी ॥ सुश्रीस्सुरूपा कपिला हव्यकव्यवहातिच ॥ इत्येता हव्यवाहस्य कलादशविधाः स्मृताः ॥

ॐ जातवेदसेसुनवामसोममरातीयतोनिदहातिवेदः ॥ सनःपर्षदतिदुर्गाणिविश्वानावेवसिंधुंदुरितात्यग्निः ॥

इत्यग्निकलामावाह्य ॥ पीठे अधोमुखं शंखं प्रतिष्ठाप्य सूर्यकलामावाहयेत् ॥

तपिनी तापिनी धूम्रा मरीची ज्वालिनी रुचिः ॥ सुषुम्ना भोगदा विश्वा बोधिनी धारिणी क्षमा ॥ इत्येतास्सूर्यबिंबस्य कला द्वादशसंस्मृताः ॥ अं अर्कमंडलायार्थप्रदद्वादशकलात्मनेनमः ॥

ॐ आकृष्णेनरजसावर्तमानोनिवेशयन्नमृतंमर्त्यं च ॥ हिरण्ययेनसवितारथेनादेवोयातिभुवनानिपश्यन् ॥

इतिसूर्यकलामावाह्य ॥ उत्तानीकृत्य ॥ ॐ हृदयाय नमः इतिशंखेगंध-पुष्पाक्षतान्निक्षिप्य ॥ क्षकाराद्यकारांतैर्मातृकाक्षरैर्जलमापूर्य ॥ ततश्चंद्रकलामावाहयेत् ॥ शंखेजलमापूर्य ॥

उं सोममंडलाय कामप्रद षोडशकलात्मने नमः ॥ अमृतामानदापूषा तुष्टिपुष्टीरतिधृतिः ॥ शशिनी चंद्रिका कांतिर्ज्योत्स्ना श्रीःप्रीतिरंगदा ॥ पूर्णा पूर्णामृताचैव कलाष्षोडश संस्मृताः ॥

ॐ आप्यायस्वसमेतुतेविश्वतःसोमवृष्ण्यम् ॥ भवावाजस्य-संगथे ॥

इति सोमकलामावाह्य ॥

गंगे च यमुने चैव गोदावरि सरस्वति ॥ नर्मदे सिंधुकावेरि जलेस्मिन्सन्निधिं कुरु ॥ अहिर्बुध्न्य ऋषिः ॥ अनुष्टुप् छंदः ॥ श्रीपांचजन्योदेवता ॥ शां हृदयाय नमः ॥ शीं शिरसे स्वाहा ॥ शूं शिखायै वषट् ॥ शैं कवचाय हूं ॥ शौं नेत्रत्रयाय वौषट् ॥ शः अस्त्राय फट् ॥

## ॥ ध्या न म् ॥

लक्ष्मीभर्तुर्भुजाग्रे कृतवसतिसितं यस्यरूपं विशालं नीलाद्रे स्तुंगशृंगस्थितमिव रजनीनाथबिंबं विभाति ॥ पायान्नः पांचजन्यो सदितिसुतकुलंत्रासयन् पूरयन् स्वैर्निध्वानैर्नीरदौघ ध्वनिपरिभव-दैरंबरं कंबुराजः ॥ शं पांचजन्याय नमः ॥

इति जपं समर्पयामि ॥

त्वं पुरा सागरोत्पन्नो विष्णुना विधृतःकरे ॥ निर्मितः सर्वदेवैश्च पांचजन्य नमोस्तु ते ॥ गर्भादेवारिनारीणां विशीर्यंते सहस्रधा ॥ तव नादेन पाताले पांचजन्य नमोऽस्तु ते ॥

ॐ पांचजन्याय विद्महे महद्युतिकराय धीमहि ॥ तन्नश्शंखः प्रचोदयात् ॥

इतिशंखगायत्रीजपानंतरं किंचिच्छंखोदकं वामहस्तेतले निक्षिप्य पुष्पं

गृहीत्वा शखोदकेन पूजाद्रव्याणि याग भूमिंच आपोहिष्ठेति मंत्रेण संप्रोक्ष्य ॥ कलशे किंचिन्निनयेत् ॥ ततो वामहस्तास्थितोदकेनात्मानं संप्रोक्ष्य ॥ शखं देवस्य दक्षिणदिग्भागे संस्थाप्य ॥ पुनः शंखार्चनं कृत्वात्मार्चनं करिष्ये ॥

**अं आत्मने नमः ॥ उं अंतरात्मने नमः ॥ मं परमात्मने नमः ॥ ह्रीं ज्ञानात्मने नमः ॥**

गंधादीन्धारयेत्धस्ते त्वर्चयेदष्टपत्रिकाम् ॥ कर्णिकां संविलिख्याथ मूर्ध्नि हस्तं विनिक्षिपेत् ॥

**अच्युतोहमनन्तोहं ब्रह्मात्मा ध्यानपूर्वकम् ॥ योवेंदादौस्वरः प्रोक्तो वेदांते च प्रतिष्ठितः॥ तस्य प्रकृतिलीनस्य यः परस्समहेश्वरः॥ भावयित्वा विसृज्याथ पुष्पमाघ्राय दक्षिणे ॥ ॐ चंडेश्वराय नमः ॥**

इतिनिर्माल्यं विसृज्य ॥

## ॥ अथ लघुन्यासः ॥

**मंडलांतरगतं हिरण्मयं भ्राजमानवपुषं शुचिस्मितम् ॥ चंडदीधितिमखंडविग्रहं चिंतयेन्मुनिसहस्रसेवितम् ॥ १ ॥**

अथातोरुद्रस्नानार्चनाभिषेकविधिं व्याख्यास्यामः ॥ उदित एव तीर्थे स्नात्वोदेत्य शुचिः प्रयतो ब्रह्मचारी शुक्लवासाः ॥ तस्य दक्षिणा प्रत्यग्देशे तन्मुखः स्थित्वा ॥ आत्मनि देवताः स्थापयेत् ॥

**अग्निःकांडर्षिः ॥ अघोरघोराश्चेति बीज शक्तयः ॥ चकारश्चेति कीलकम् ॥ श्रीरुद्रोदेवता ॥**

श्रीरुद्रप्रीत्यर्थे लघुन्यासे विनियोगः

**प्रजनने ब्रह्मा तिष्ठतु ॥ पादयोर्विष्णुस्तिष्ठतु ॥ हस्तयोर्हरस्तिष्ठतु ॥ बाह्वोरिंद्रस्तिष्ठतु ॥ जठरे अग्निस्तिष्ठतु ॥ हृदये शिवस्तिष्ठतु ॥ कंठे वसवस्तिष्ठंतु ॥ वक्त्रे सरस्वती तिष्ठतु ॥ नासिकायां वायुस्तिष्ठतु ॥ नयनयोश्चंद्रादित्यौ तिष्ठेताम् ॥**

कर्णयोरश्विनौदेवौ तिष्ठेताम् ।। ललाटे रुद्रास्तिष्ठंतु मूर्ध्न्यादित्यास्तिष्ठंतु ।। शिरसि महादेवस्तिष्ठतु ।। शिखायां चामुंडा तिष्ठतु ।। पृष्ठे पिनाकी तिष्ठतु ।। पुरतः शूलिनी तिष्ठतु ।। पार्श्वयोश्शिवाशंकरौ तिष्ठेताम् ।। सर्वतो वायुस्तिष्ठतु ।। ततो बहिस्सर्वतोग्निज्वालामालापरिवृतास्तिष्ठतु ।। सर्वेष्वंगेषु सर्वा देवता यथास्थानं तिष्ठंतु ।। माऽँरक्षंतु ।। यजमानऽँरक्षंतु ।। अग्निर्मे वाचिश्रित इत्यादिभिर्यथालिंगमंगानि समृज्य ।। अग्निर्वायुस्सूर्यश्चंद्रमा दिश आपः पृथिव्योषधिवनस्पतय इंद्रः पर्जन्य ईशान आत्मा ।।

ॐ अग्निर्मेवाचिश्रितः वाग्हृदये हृदयंमयि अहममृतं अमृतंब्रह्मणि ।। १ ।। वायुर्मेप्राणेश्रितः प्राणोहृदये हृदयंमयि अहममृतं अमृतंब्रह्मणि ।। २ ।। सूर्योमेचक्षुषिश्रितःचक्षुर्हृदये हृदयंमयि अहममृतं अमृतंब्रह्मणि ।। ३ ।। चंद्रमामेमनसिश्रितः मनोहृदये हृदयंमयि अहममृतं अमृतंब्रह्मणि ।। ४ ।। दिशोमेश्रोत्रेश्रिताः श्रोत्रऽँहृदये हृदयंमयि अहममृतं अमृतंब्रह्मणि ।। ५ ।। आपोमेरेतसिश्रिताः रेतोहृदये हृदयंमयि अहममृतं अमृतंब्रह्मणि ।। ६ ।। पृथिवीमेशरीरेश्रिता शरीरऽँहृदये हृदयंमयि अहममृतं अमृतंब्रह्मणि ।। ७ ।। ओषधिवनस्पतयोमेलोमसुश्रिताः लोमानिहृदये हृदयंमयि अहममृतं अमृतंब्रह्मणि ।। ८ ।। इंद्रोमेबलेश्रितः बलऽँहृदये हृदयंमयि अहममृतं अमृतंब्रह्मणि ।।९।। पर्जन्योमेमूर्ध्निश्रितः मूर्धाहृदये हृदयंमयि अहममृतं

अमृतंब्रह्मणि ॥ १० ॥ ईशानोमेमन्यौश्रितः मन्युर्हृदये हृदयंमयि अहममृते अमृतंब्रह्मणि ॥ ११ ॥ आत्मामं आत्मनिश्रितः आत्माहृदये हृदयंमयि अहममृते अमृतंब्रह्मणि ॥ १२ ॥ पुनर्म आत्मा-पुनरायुरागात् पुनःप्राणःपुनराकूतमागात् वैश्वानरोरश्मिभिर्वावृधानः अंतस्तिष्ठत्वमृतस्यगोपाः ॥

अथैनंगंधाक्षतपत्रपुष्पधूपदीपनैवेद्यतांबूलैरभ्यर्च्य ॥ आत्मानंप्रत्याराधयेत ॥

शुद्धस्फटिकसंकाशं त्रिनेत्रं पंचवक्त्रकम् ॥ गंगाधरं दशभुजं सर्वाभरणभूषितम् ॥१॥ नीलग्रीवं शशांकांकं नागयज्ञोपवीतिनम् ॥ व्याघ्रचर्मोत्तरीयंच वरेण्यमभयप्रदम् ॥२॥ कमंडल्वक्षसूत्राभ्यामन्वितं शूलपाणिनम् ॥ ज्वलंतं पिंगलजटा शिखामुद्योतकारिणम् ॥ ३ ॥ अमृतेनाप्लुतं हृष्टमुमादेहार्धधारिणम् ॥ वृषस्कंधसमारूढं दिव्यभोग-समन्वितम् ॥ ४ ॥ दिग्देवतासमायुक्तं सुरासुर नमस्कृतम् ॥ नित्यं च शाश्वतं शुद्धं ध्रुवमक्षरमव्ययम् ॥ ५ ॥ सर्वव्यापिनमीशानं रुद्रं वै विश्वरूपिणम् ॥ एवंध्यात्वाद्विजस्सम्यक्ततोयजनमारभेत् ॥ ६ ॥ आराधितो मनुष्यैस्त्वं सिद्धैर्देवासुरादिभिः ॥ आराधयामि भक्त्या त्वा मां गृहाण महेश्वर ॥ ७ ॥ देहो देवालयःप्रोक्तो जीवो देव-स्सदाशिवः ॥ त्यजेदज्ञाननिर्माल्यं सोहंभावेन पूजयेत् ॥ ८ ॥ स्वामि-न्सर्वजगन्नाथ यावत्पूजावसानकम् ॥ तावत्त्वं प्रीतिभावेन लिंगेस्मि-न्सन्निधिंकुरु ॥ ९ ॥

ॐ त्र्यंबकंयजामहेसुगंधिंपुष्टिवर्धनम् । उर्वारुकमिवबंधना-न्मृत्योर्मुक्षीयमामृतात् ॥ इत्यावाह्य ॥

ॐ आत्वावहंतु हरयस्सचेतस श्वेतैरश्वैस्सहकेतुमद्भिः ॥
वाताजवैर्बलवद्भिर्मनोजवैरायाहिशीघ्रं मम हव्यायशर्वोम् ॥

इतीशानमावाहयामि ॥

सद्यो जातं प्रपद्यामि आवाहनं समर्पयामि ॥ सद्योजाताय वै नमो नमः आसनं समर्पयामि ॥ भवे भवेनाति पाद्यम् स० ॥ भवे भवस्वमां अर्घ्यम् स० ॥ भवोद्भवाय नमः आचमनीयं समर्पयामि ॥ वामदेवाय नमः स्नानं स० ॥ ज्येष्ठाय नमाः वस्त्रम् स० ॥ श्रेष्ठाय नमः उपवीतं स० ॥ रुद्राय नमः आभरणं स० ॥ कालाय नमः गंधं स० ॥ कलविकरणाय नमः तिलाक्षतान् स० ॥ बलविकरणाय नमः बिल्वपत्रं स० ॥ बलाय नमः धूपं स० ॥ बलप्रमथनाय नमः दीपं स० ॥ सर्वभूतदमनाय नमः नैवेद्यं स० ॥ मनोन्मनाय नमः तांबूलं स० ॥ अघोराय नमः नीराजनं स० ॥ तत्पुरुषाय नमः मंत्रपुष्पं स० ॥ नमस्तेस्तुभगवन्निति नमस्कारान्समर्पयामि ॥ हिरण्यगर्भाय नमः हिरण्यपुष्पं समर्पयामि ॥ अर्कचंपकपुन्नागनंद्यावर्तैश्चपाटलैः ॥ बृहतीकरवीरैश्चद्रोणपुष्पैस्समर्चयेत् ॥ ॐ भवाय देवाय नमः ॥ शर्वाय देवाय नमः ॥ ईशानाय देवाय नमः ॥ पशुपतये देवाय नमः ॥ उग्राय देवाय नमः ॥ रुद्राय देवाय नमः ॥ भीमाय देवाय नमः ॥ महते देवाय नमः ॥ भवस्य देवस्य पत्न्यै नमः ॥ शर्वस्य देवस्य पत्न्यै नमः ॥ ईशानस्य देवस्य पत्न्यै नमः ॥ पशुपतेर्देवस्य पत्न्यै नमः ॥ उग्रस्य देवस्य पत्न्यै नमः ॥ रुद्रस्य देवस्य पत्न्यै नमः ॥ भीमस्य देवस्य पत्न्यै नमः ॥ महतो देवस्य पत्न्यै नमः ॥

बिल्वाक्षतकुशाग्रहस्तोदेवतीर्थेन तर्पयेत् ॥

ॐ भवं देवं तर्पयामि ॥ शर्वं देवं तर्पयामि ॥ ईशानं देवं तर्पयामि ॥ पशुपतिं देवं तर्पयामि ॥ उग्रं देवं तर्पयामि ॥ रुद्रं देवं तर्पयामि ॥ भीमं देवं तर्पयामि ॥ महांतं देवं तर्पयामि ॥ भवस्य देवस्य पत्नीं तर्पयामि ॥ शर्वस्य देवस्य पत्नीं तर्पयामि ॥ ईशानस्य देवस्य पत्नीं तर्पयामि ॥ पशुपतेर्देवस्य पत्नीं तर्पयामि ॥ उग्रस्य देवस्य पत्नीं तर्पयामि ॥ रुद्रस्य देवस्य पत्नीं तर्पयामि ॥ भीमस्य देवस्य पत्नीं तर्पयामि ॥ महतो देवस्य पत्नीं तर्पयामि ॥

॥ इति तर्पणम् ॥

अथाष्टभिर्मंत्रैरष्टपुष्पाणि समर्पयामि ॥

## ॥ अथास्याघोरतनूरुपतिष्ठते ॥

अथशिवस्यमूर्ध्निहिरण्यकलशोदकेनसंततमुदकधारान्यभिषिंचन् ॥ पयसा सर्पिषा दध्ना मधुना इक्षुरसेन आम्ररसेन नारीकेळसलिलेन गुडोदकेन पुष्पोदकेन फलोदकेनाथवा वै शुद्धोदकेन वा आदौ शंचम इत्यनुवाकं नमस्ते रुद्रमन्यव इत्येकादशानुवाकान् अग्नाविष्णूसजोषस इति प्रत्येकमेकं जपेत् ॥

सर्वेषां वारे वारे पुनराराधनं उत्तमाराधनम् पापक्षयार्थी व्याधिनाशनार्थी शत्रुनाशनार्थी जीवितार्थी मोक्षार्थी श्रीकामश्शांतिकामः पुष्टिकामस्तुष्टिकामो वृद्धिकाम आयुष्यकाम आरोग्यकामोन्नादिकामो मेधाकामः प्रज्ञाकाम एवं कुर्वन्नाचार्येभ्य ऋत्विग्भ्यस्सवत्सां सालंकारां गां दद्यात् एकादशब्राह्मणान् भोजयिष्ये अश्वमेधक्रतुफलं वाप्नोतीत्याह भगवान् बोधायनः ॥ इति लघुन्यासः ॥

## ॥ अथ पंचामृताभिषेकः ॥

अस्यश्रीपंचद्रव्यदेवतामंत्रस्य गौतमवामदेवपरमेष्ठीप्रजापति-

विश्वामित्राऋषयः ॥ गायत्र्युष्णिगनुष्टुब्बृहतीपंक्त्यश्छंदांसि ॥ सोमवायुरविविश्वेदेवसवितारोदेवताः ॥ पंचद्रव्यदेवताप्रीत्यर्थे तत्तद्रव्याभिमंत्रणेविनियोगः ॥

ॐ आप्यायस्वसमेतुतेविश्वतःसोमवृष्ण्यं ॥ भवावाजस्यसंगथे ॥ इति क्षीरम् ॥

ॐ दधिक्राव्णोअकारिषं जिष्णोरश्वस्यवाजिनः सुरभिनोमुखाकरत्प्रणआयूंषितारिषत् ॥ इति दधि ॥

ॐ घृतंमिमिक्षेघृतमस्ययोनिर्घृतेश्रितोघृतमवस्यधाम ॥ अनुष्वधमावहमादयस्वस्वाहाकृतंऋषभवक्षिहव्यम् ॥ इति घृतम् ॥

ॐ मधुवाताऋतायतेमधुक्षरंतिसिंधवः॥ माध्वीर्नस्संत्वोषधीः॥ इति मधु ॥

ॐ स्वादुःपवस्वदिव्यायजन्मने स्वादुरिंद्रायसुहवीतुनाम्ने ॥ स्वादुर्मित्रायवरुणायवायवेबृहस्पतयेमधुमाँअदाभ्यः ॥ इति शर्करा ॥

क्षीरादिपंचद्रव्येषु सोमाय नमः ॥ वायवे नमः ॥ रवये नमः ॥ सवित्रे नमः ॥ विश्वेभ्यो देवेभ्यो नमः ॥

ध्यानावाहनादिषोडशोपचारपूजां समर्पयामि ॥ पंचब्रह्मपूजां करिष्ये ॥

सद्योजाताय नमः ॥ वामदेवाय नमः ॥ अघोराय नमः ॥ तत्पुरुषाय नमः ॥ ईशानाय नमः ॥ पंचब्रह्मदेवताभ्यो नमः ॥

ध्यानाद्युपचारान्समर्पयामि ॥ तत्रादौ देवस्यमलापकर्षणार्थं आपोहिष्ठेति मंत्रेण स्नानं कुर्यात् ॥ क्षीरेणस्नापयिष्ये ॥

ॐ आनीतकल्पतरुपुष्पसुगंधमाल्यै
विंद्याधरैःश्रुतिधरैरुपवर्णियंतम् ॥
मूर्भिस्खलत्तुहिनदीधितिसोदरैश्च
क्षीरैर्निरंतरमहंस्नपयामिशंभुम् ॥ १ ॥

ॐ आप्यायस्वसमेतुते० ॥

श्रीभवानीशंकराय नमः ॥ क्षीरस्नानं समर्पयामि ॥

क्षीरस्नानानंतर शुद्धोदकस्नानं करिष्ये ॥

ॐ सद्योजातंप्रपद्यामिसद्योजातायवैनमोनमः ॥
भवेभवेनातिभवेभवस्वमां भवोद्भवायनमः ॥

शुद्धोदकस्नानं समर्पयामि ॥ दध्नास्नापयिष्ये ॥

ॐ ब्रह्मादिदेवगणनम्यकिरीटनाना
रत्नप्रभापटलपिंछलितांघ्रिपद्मम् ॥
लोकेश्वरेश्वरमकुंठितवीर्यमेतत्
दध्नानिरंतरमहंस्नपयामिशंभुम् ॥ २ ॥

ॐ दधिक्राव्णोअकारिषं० ॥

श्री भवानीशंकराय नमः ॥ दधिस्नानं समर्पयामि ॥

दधिस्नानानंतरं शुद्धोदकस्नानं करिष्ये ॥

ॐ वामदेवायनमोज्येष्ठायनमः श्रेष्ठायनमोरुद्रायनमः
कालायनमः कलविकरणायनमो बलविकरणायनमो बलायनमो
बलप्रमथनायनमस्सर्वभूतदमनायनमो मनोन्मनाय नमः ॥

शुद्धोदकस्नानं समर्पयामि ॥ घृतेनस्नापयिष्ये ॥

ॐ देवत्रिशूलधरचार्चितदेवदेव
देवैरदर्शितानिजामलपादपद्मम् ॥
राज्यप्रदंहिभजतांनवनीतनीतै
राज्यैरहंशुभकरंस्नपयामिशंभुम् ॥ ३ ॥

ॐ घृतंमिमिक्षेघृतमस्ययोनिः० ॥

श्रीभवानीशंकराय नमः ॥ घृतस्नानं समर्पयामि ॥

घृतस्नानानंतरं शुद्धोदकस्नानं करिष्ये ॥

ॐ अघोरेभ्योथघोरेभ्योघोरघोरतरेभ्यः ॥ सर्वेभ्यस्सर्व-शर्वेभ्योनमस्तेअस्तुरुद्ररूपेभ्यः ॥

शुद्धोदकस्नानं समर्पयामि ॥ मधुनास्नापयिष्ये ॥

ॐ भक्तेष्टदाननिरतंसततंगिरींद्र
कन्यावभासितनिजोन्नतवामपार्श्वम् ॥
श्रद्धावतामभिमतार्थकरंत्रिनेत्रं
सिंचाम्यहंमधुमयंमधुनाथशंभुम् ॥ ४ ॥

ॐ मधुवाताऋतायते० ॥

श्रीभवानीशंकराय नमः मधुस्नानं समर्पयामि ॥

मधुस्नानानंतरं शुद्धोदकस्नानं करिष्ये ॥

ॐ तत्पुरुषायविद्महेमहादेवायधीमहि ॥ तन्नोरुद्रःप्रचो-दयात् ॥

शुद्धोदकस्नानं समर्पयामि ॥ शर्करया स्नापयिष्ये ॥

ॐ गंगातरंगनटिकानवरंगतोऽति
तुंगार्चितायतजटानिकुरंबमेनम् ॥
जंभारिसंभृतनवप्रसवार्चितांघ्रिं
सिंचामिशंकरमहंवरशर्कराभिः ॥ ५ ॥

ॐ स्वादुःपवस्वदिव्यायजन्मने० ॥

श्रीभवानीशंकराय नमः ॥ शर्करास्नानं समर्पयामि ॥

ततश्शुद्धोदकस्नानं करिष्ये ॥

ॐ ईशानस्सर्वविद्यानामीश्वरःसर्वभूतानांब्रह्माधिपतिर्ब्रह्मणोधिपतिर्ब्रह्माशिवोमेअस्तुसदाशिवोम् ॥

शुद्धोदकस्नानं समर्पयामि ॥ फलोदकेनस्नापयिष्ये ॥

ॐ याःफलिनीर्याअफलाअपुष्पायाश्चपुष्पिणीः ॥ बृहस्पतिप्रसूतास्तानोमुंचंत्वंहसः ॥

श्रीभवानीशंकराय नमः ॥ फलोदकस्नानं समर्पयामि ॥

ततस्तत्पुरुषायेतिरुद्रगायत्र्याशुद्धोदकस्नानं कुर्यात् ॥

क्षीरंदधिघृतोपेतंमधुशर्करयान्वितम् ॥ पंचामृतंगृहाणेदं जगन्नाथनमोस्तुते ॥ इति पंचामृताभिषेकः ॥

## ॥ अथ रुद्रः ॥

अस्य रुद्रस्य प्रश्नस्य अनुष्टुप् छंदस्य अघोर ऋषिः संकर्षण मूर्तिस्वरूपो योसावादित्यः परमपुरुषस्सएष रुद्रो देवता अग्ने क्रतुत्तरमायामिष्टिकायाँऽशतरुद्रिय जपे विनियोगः ॥ सकलस्य रुद्राध्यायस्य श्रीरुद्रो देवता एका गायत्री छंदः तिस्रः

पंक्तयः सप्तानुष्टुप् द्वे जगत्यौ परमेष्ठी ऋषिः श्रीरुद्रो देवता श्रीभवानीशंकर देवता प्रीत्यर्थे जपे विनियोगः ॥ अग्निहोत्रात्मने अंगुष्ठाभ्यां हृदयाय नमः ॥ दर्शपूर्णमास्यात्मने तर्जनीभ्यां शिरसे स्वाहा ॥ चातुर्मास्यात्मने मध्यमाभ्यां शिखायैवषट् ॥ निरूढपशुबंधात्मने अनामिकाभ्यां कवचाय हूं ॥ ज्योतिष्टोमात्मने कनिष्ठिकाभ्यां नेत्रत्रयाय वौषट् ॥ सर्वक्रत्वात्मने करतलकरपृष्ठाभ्यां अस्त्राय फट् ॥ ध्यानम् ॥ आपाताळनभस्थलांतभुवनब्रह्मांडमाविस्फुरज्ज्योतिस्फाटिकलिंगमौळिविलसत्पूर्णेंदुवांतामृतैः ॥ अस्तोकाप्लुतमेकमीशमनिशं रुद्रानुवाकांजपन् ॥ ध्यायेदीप्सितसिद्धये-घृतपद्म् विप्रोभिषिंचेच्छिवम् ॥ शुद्धस्फटिकसंकाशंशुद्धविद्याप्रदायकम् ॥ शुद्धंसच्चित्सुखानंदं शुद्धपूर्णमहंभजे ॥ ॐ नमोभगवते-रुद्राय मृत्योर्मेपाहि हरिः ॐ ॥

ततो नमकचमकैर्गवयश्रृंगेण शिवस्य मूर्ध्निकलशोदकमभिषिंचेत् ॥

ॐ नमस्तेरुद्रमन्यवउतोतइषवेनमः । नमस्तेअस्तु धन्वनेबाहुभ्यामुततेनमः यातइषुःशिवतमाशिवंबभूवतेधनुः । शिवाशरव्यायातवतयानोरुद्रमृडय । यातेरुद्रशिवातनूरघोरापापकाशिनी । तयानस्तनुवाशंतमयागिरिशंताभिचाकशीहि । यामिषुंगिरिशंतहस्ते(१) बिभर्ष्यस्तवे । शिवांगिरित्रतांकुरुमाहिंसीःपुरुषंजगत् । शिवेनवचसात्वागिरिशाच्छावदामसि । यथानःसर्वमिज्जगदयक्ष्मँऽसुमनाअसत् । अध्यवोचदधिवक्ताप्रथमो दैव्योभिषक् । अहींऽश्चसर्वान्जंभयन्त्सर्वांश्चयातुधान्यः । असौयस्ताम्रोअरुणउतबभ्रुस्सुमंगलः । येचेमाँऽरुद्राअभितोदिक्षु(२)श्रिताःसहस्रशोऽ-

वेषाऽँहेडईमहे । असौयोऽवसर्पतिनीलग्रीवोविलोहितः । उतैनं-
गोपाअंदृशन्नदृशन्नुदहार्यः । उतैनंविश्वाभूतानिसदृष्टोमृडयातिनः ॥
नमोअस्तुनीलग्रीवायसहस्राक्षायमीढुषे । अथोयेअस्यसत्वानोऽहंतेभ्योऽ-
करंनमः । प्रमुंच धन्वंनस्त्वमुभयोरार्त्नियोर्ज्याम् । याश्चंतेहस्तइषवः-
(३)परातांभगवोवप । अवतत्यधनुस्त्वँसहस्राक्षशतेषुधे । निशीर्य-
शल्यानांमुखाशिवोनःसुमनाभव । विज्यंधनुःकपर्दिनोविशल्यो-
बाणवाँउत । अनेशन्नस्येषवआभुरस्यनिषंगधिः । यातेहेतिर्मीढुष्टम-
हस्तेबभूवतेधनुः । तयास्मान्विश्वतस्त्वमयक्ष्मयापरिभुज ।
नमस्तेअस्त्वायुधायानाततायधृष्णवे । उभाभ्याम्(४)उततेनमो-
बाहुभ्यांतवधन्वने । परितेधन्वनोहेतिरस्मान्वृणक्तुविश्वतः ।
अथोयइषुधिस्तवारेअस्मन्निधेहितम् । नमस्तेऽस्तुभगवन्विश्वेश्व-
रायमहादेवायत्र्यंबकायत्रिपुरांतकायत्रिकाग्निकालाय कालाग्निरुद्राय
नीलकंठायसर्वेश्वरायसदाशिवायश्रीमन्महादेवायनमः ॥ १ ॥

मृत्युंजयाय

ॐ नमोहिरण्यबाहवेसेनान्येदिशांचपतयेनमोनमोवृक्षेभ्योहरि-
केशेभ्यःपशूनांपतयेनमो नमःसस्पिंजरायत्विषीमतेपथीनांपतयेनमो-
नमोबभ्लुशायविव्याधिनेऽन्नानांपतयेनमो नमोहरिकेशायोपवीतिने-

पुष्टानांपतयेनमोनमोभवस्यहेत्यैजगतांपतयेनमो नमोरुद्रायातता-
विनेक्षेत्राणांपतयेनमो नमःसूतायाहन्त्यायवनानांपतयेनमोनमः(१)
रोहितायस्थपतयेवृक्षाणांपतयेनमोनमोमंत्रिणेवाणिजायकक्षाणांपतये-
नमोनमोभुवंतयेवारिवस्कृतायौषधीनांपतयेनमोनम उच्चैर्घोषाया-
क्रंदयतेपत्तीनांपतयेनमोनमःकृत्स्नवीतायधावतेसत्वनांपतयेनमः ॥ २ ॥

ॐ नमःसहमानायनिव्याधिनआव्याधिनीनांपतयेनमोनमः
ककुभायनिषङ्गिणेस्तेनानांपतयेनमो नमोनिषङ्गिणइषुधिमतेतस्करा-
णांपतयेनमोनमो वञ्चतेपरिवञ्चतेस्तायूनांपतयेनमोनमो निचेरवेपरि-
चरायारण्यानांपतयेनमो नमःसृकाविभ्योजिघांऽसद्भ्योमुष्णतां-
पतयेनमो नमोऽसिमद्भ्योनक्तंचरद्भ्यःप्रकृन्तानांपतयेनमो नम-
उष्णीषिणेगिरिचरायकुलुञ्चानांपतयेनमो नमः(१)इषुमद्भ्योधन्वा-
विभ्यश्चवोनमोनम आतन्वानेभ्यःप्रतिदधानेभ्यश्चवोनमोनम आय-
च्छद्भ्योविसृजद्भ्यश्चवोनमो नमोऽस्यद्भ्योविध्यद्भ्यश्चवोनमो नम-
आसीनेभ्यःशयानेभ्यश्चवोनमोनमः स्वपद्भ्योजाग्रद्भ्यश्चवोनमो
नमस्तिष्ठद्भ्योधावद्भ्यश्चवोनमो नमःसभाभ्यःसभापतिभ्यश्चवोनमो
नमोअश्वेभ्योऽश्वपतिभ्यः(२)च वो नमः ॥ ३ ॥

ॐ नमआव्याधिनीभ्योविविध्यन्तीभ्यश्चवोनमोनमउगणाभ्य-
स्तृऽहतीभ्यश्चवोनमो नमोगृत्सेभ्योगृत्सपतिभ्यश्चवोनमो नमोव्राते-
भ्योव्रातपतिभ्यश्चवोनमो नमोगणेभ्योगणपतिभ्यश्चवोनमो नमो-
विरूपेभ्योविश्वरूपेभ्यश्चवोनमो नमोमहद्भ्यः क्षुल्लकेभ्यश्चवोनमो-
नमोरथिभ्योऽरथेभ्यश्चवोनमोनमोरथेभ्यः(१)रथपतिभ्यश्चवोनमोनमः-
सेनाभ्यःसेनानिभ्यश्चवोनमो नमःक्षतृभ्यःसंग्रहीतृभ्यश्चवोनमो नम-
स्तक्षभ्योरथकारेभ्यश्चवोनमो नमःकुलालेभ्यः कर्मारेभ्यश्चवोनमो-
नमःपुंजिष्टेभ्योनिषादेभ्यश्चवोनमोनमइषुकृद्भ्योधन्वकृद्भ्यश्चवोनमो
नमोमृगयुभ्यःश्वनिभ्यश्चवोनमो नमःश्वभ्यःश्वपतिभ्यश्च(२)
वोनमः ॥ ४ ॥

ॐ नमोभवायचरुद्रायचनमःशर्वायचपशुपतयेच नमोनील-
ग्रीवायचशितिकंठायच नमःकपर्दिनेचव्युप्तकेशायचनमःसहस्राक्षाय-
चशतधन्वनेच नमोगिरिशायचशिपिविष्टायच नमोमीढुष्टमायचेषुमते-
चनमोह्रस्वायचवामनायचनमोबृहतेचवर्षीयसेचनमोवृद्धायचसंवृध्वने-
च(१)नमोअग्रियायचप्रथमायचनमआशवेचाजिरायचनमःशीघ्रियाय-
चशीभ्यायच नमऊर्म्यायचावस्वन्यायचनमःस्रोतस्यायचद्वीप्यायच
॥ ५ ॥

ॐ नमोज्येष्ठायच कनिष्ठायच नमःपूर्वजायचापरजायच नमोमध्यमायचापगल्भायच नमोजघन्यायचबुध्नियायच नमः सोभ्यायचप्रतिसर्यायच नमोयाम्यायचक्षेम्यायचनमउर्वर्यायच-खल्यायचनमः श्लोक्यायचावसान्यायचनमोवन्यायचकक्ष्यायच-नमः श्रवायचप्रतिश्रवायच(१)नमआशुषेणायचाशुरथायचनमः शूरा-यचावभिंदतेचनमोवर्मिणेचवरूथिनेचनमो बिल्मिनेचकवचिनेचनमः-श्रुतायचश्रुतसेनायच ॥ ६ ॥

ॐ नमोदुंदुभ्यायचाहनन्यायच नमोधृष्णवेचप्रमृशायच नमोदूतायचप्रहितायच नमोनिषङ्गिणेचेषुधिमतेच नमस्तीक्ष्णेष-वेचायुधिनेच नमःस्वायुधायचसुधन्वनेचनमःस्रुत्यायचपथ्यायचनमः-काट्यायच नीप्यायचनमःसूद्यायचसरस्यायचनमोनाद्यायच वैशं-तायच(१)नमःकूप्यायचावट्यायच नमोवर्ष्यायचावर्ष्यायच नमो-मेघ्यायच विद्युत्यायचनमईध्रियायचातप्यायच नमोवात्यायचरेष्मि-यायचनमोवास्तव्यायचवास्तुपायच ॥ ७ ॥

ॐ नमःसोमायच रुद्रायचनमस्ताम्रायचारुणायचनमःशङ्गाय-चपशुपतयेच नमउग्रायचभीमायच नमोअग्रेवधायचदूरेवधायच-नमोहंत्रेच हनीयसेचनमोवृक्षेभ्यो हरिकेशेभ्योनमस्ताराय-नमःशंभवेचमयोभवेचनमःशंकरायचमयस्करायच नमःशिवा-

यंच शिवतंरायच(१)नमस्तीर्थ्यायचकूल्यायचनमः पार्यायचावार्या-
यच नमःप्रतरणायचोत्तरणायच नमआतार्यायचालाद्यायच नमः-
शष्प्यायचफेन्यायचनमःसिकत्यायचप्रवाह्यायच ॥ ८ ॥

ॐ नमइरिण्यायचप्रपथ्यायच नमःकिँशिलायच क्षयणा-
यचनमःकपर्दिनेचपुलस्तयेच नमोगोष्ठ्यायचगृह्यायच नमस्तल्प्या-
यच गेह्यायचनमःकाट्यायचगह्वरेष्ठायचनमोहृदय्यायचनिवेष्प्यायच
नमःपाँसव्यायच रजस्यायच नमःशुष्क्यायचहरित्यायच
नमोलोप्यायचोलप्यायच(१) नमऊर्व्यायचसूर्म्यायच नमःपर्ण्या-
यचपर्णशद्यायचनमोऽपगुरमाणायचाभिघ्नतेच नमआखिदतेच
प्रखिदतेचनमोवःकिरिकेभ्योदेवानाँहृदयेभ्योनमोविक्षीणकेभ्यो
नमोविचिन्वत्केभ्यो नमआनिर्हतेभ्यो नमआमीवत्केभ्यः ॥ ९ ॥

ॐ द्रापेअंधसस्पतेदरिद्रन्नीललोहित । एषांपुरुषाणामेषां-
पशूनांमाभेर्माऽरोमोएषांकिंचनाममत् । यातेरुद्रशिवातनूःशिवा-
विश्वाहभेषजी । शिवारुद्रस्यभेषजीतयानोमृडजीवसे । इमाँ-
रुद्रायतवसेकपर्दिनेक्षयद्वीरायप्रभरामहेमतिम् । यथानःशमसद्
द्विपदेचतुष्पदेविश्वंपुष्टंग्रामेअस्मिन्(१)अनातुरं । मृडानोरुद्रोत-

नोमयस्कृधिक्षयद्वीरायनमसाविधेमते । यच्छंचयोश्चमनुरायजे-
पितातदश्यामतवरुद्रप्रणीतौ । मानोमहान्तमुतमानोअर्भकंमान-
उक्षन्तमुतमानंउक्षितम् । मानोवधीःपितरंमोतमातरंप्रियामानस्त-
नुवः(२)रुद्ररीरिषः । मानस्तोकेतनयेमानआयुषिमानोगोषुमा-
नोअश्वेषुरीरिषः । वीरान्मानोरुद्रभामितोवधीर्हविष्मन्तोनमसा-
विधेमते । आरात्तेगोघ्नउतपूरुषघ्नेक्षयद्वीरायसुम्नमस्मेतेअस्तु ।
रक्षाचनोअधिचदेवब्रूह्यधाचनःशर्मयच्छाद्विबर्हाः । स्तुहि(३)
श्रुतंगर्तसदंयुवानंमृगंनभीममुपहत्नुमुग्रम् । मृडाजरित्रेरुद्रस्त-
वानोअन्यंतेअस्मन्निवपंतुसेनाः । परिणोरुद्रस्यहेतिर्वृणक्तुपरि-
त्वेषस्यदुर्मतिरघायोः । अवस्थिरामघवद्भ्यस्तनुष्वमीढ्वस्तोकायत-
नयायमृडय । मीढुष्टमशिवतमशिवोनःसुमनाभव । परमेवृक्ष-
आयुधंनिधायकृत्तिंवसानआचरपिनाकं(४)बिभ्रदागहि । विकि-
रिद्विलोहितनमस्तेअस्तुभगवः । यास्तेसहस्रँहेतयोन्यमस्म-
न्निवपंतुताः । सहस्राणिसहस्रधाबाहुवोस्तवहेतयः । तासामी-
शानोभगवःपराचीनामुखाकृधि ॥ १० ॥

ॐ सहस्राणिसहस्रशोयेरुद्राअधिभूम्याम् । तेषाँऽसहस्र-
योजनेऽवधन्वानितन्मसि । अस्मिन्महत्यर्णवेऽन्तरिक्षेभवाअधि ।
नीलग्रीवाःशितिकंठाःशर्वाअधःक्षमाचराः । नीलग्रीवाःशिति-

कंठादिवँऽरुद्राउपश्रिताः । येवृक्षेषुसस्पिंजरानीलग्रीवाविलोहिताः । येभूतानामाधिपतयोविशिखासःकपर्दिनः । येअन्नेषुविविध्यंति-पात्रेषुपिबंतोजनान् । येपथांपथिरक्षयएेलबृदायव्युधः । येतीर्थानि(१)प्रचरन्तिसृकावन्तोनिषङ्गिणः । यएतावन्तश्चभूयाँऽसश्च-दिशोरुद्रावितस्थिरे ॥ तेषाँऽसहस्रयोजनेऽवधन्वानितन्मसि । नमोरुद्रेभ्योयेपृथिव्यांयेऽन्तरिक्षेयेदिवियेषामन्नंवातोवर्षमिषवस्तेभ्यो दशप्राचीर्दशदक्षिणादशप्रतीचीर्दशोदीचीर्दशोर्ध्वास्तेभ्यो नमस्ते-नोमृडयंतुतेयंद्विष्मोयश्चनोद्वेष्टितंवोजंभेदधामि ॥ ११ ॥

ॐ नमस्तेनमोहिरण्यबाहवेनमःसहमानायनमआव्याधिनीभ्यो नमोभवायचनमोज्येष्ठायचनमोदुंदुभ्यायचनमः सोमायच नम-इरिण्यायचद्रापेसहस्राण्येकादश ॥ ॐ ॥ सद्योजातंप्रपद्यामि सद्योजातायवैनमोनमः भवेभवेनातिभवेभवस्वमांभवोद्भवायनमः वामदेवायनमोज्येष्ठायनमः श्रेष्ठायनमोरुद्रायनमःकालायनमः कलविकरणायनमो बलविकरणायनमोबलायनमोबलप्रमथनायनमः सर्वभूतदमनायनमोमनोन्मनायनमः अघोरेभ्योथघोरेभ्योघोरघोर-तरेभ्यः सर्वेभ्यःसर्वशर्वेभ्योनमस्ते अस्तुरुद्ररूपेभ्यः । तत्पुरुषाय-विद्महेमहादेवायधीमहि तन्नोरुद्रःप्रचोदयात् ईशानः सर्व

विद्यानामीश्वरः सर्वभूतानांब्रह्माधिपतिर्ब्रह्मणोधिपतिर्ब्रह्माशिवोमे अस्तुसदाशिवोम् ॥ ॐ नमोहिरण्यबाहवेहिरण्यवर्णायहिरण्य-रूपाय हिरण्यपतयेंबिकापतयउमापतयेपशुपतयेनमोनमः ऋतꣳसत्यंपरंब्रह्मपुरुषंकृष्णपिंगलम् । ऊर्ध्वरेतंविरूपाक्षं विश्वरूपाय-वैनमोनमः विश्वंभूतंभुवनंचित्रंबहुधाजातंजायमानंचयत् सर्वोह्येष-रुद्रस्तस्मैरुद्रायनमोअस्तु । कद्रुद्रायप्रचेतसेमीढुष्टमायतव्यसे । वोचे-मशंतमꣳहृदे । सर्वोह्येषरुद्रस्तस्मैरुद्रायनमोअस्तु अपैतुमृत्युरमृतं-न्नआगन्वैवस्वतोनोअभयंकृणोतु पर्णंवनस्पतेरिवाभिनः शीयताꣳ-रयिःसचतान्नःशचीपतिः । परंमृत्योअनुपरेहिपंथांयस्तेस्वइतं-रोदेवयानात् । चक्षुष्मतेशृण्वतेतेब्रवीमिमानःप्रजाꣳरीरिषोमोत-वीरान् । वातंप्राणंमनसान्वारंभामहेप्रजापतिंयोभुवनस्यगोपाः । सनोमृत्योस्त्रायतांपात्वꣳहसोज्योग्जीवाजरामशीमहि । अमुत्र-भूयादधयद्यमस्यबृहस्पतेरभिशस्तेरमुंचः । प्रत्यौहतामाश्विना-मृत्युमस्माद्देवानामग्नेभिषजाशचीभिः । हरिꣳहरंतमनुयंतिदेवा-विश्वस्येशानंवृषभंमतीनां । ब्रह्मसरूपमनुमेदमागादयनं-माविवधीर्विक्रमस्व । शल्कैरग्निमिंधानउभौलोकौसनेमहम् । उभयोर्लोकयोर्ऋध्वातिमृत्युंतराम्यहं । माच्छिदोमृत्योमावधी-र्मामेबलंविवृहोमाप्रमोषी । प्रजांमामेरीरिष अयुरुग्रनृचक्ष-

संत्वाहविषाविधेम । मानोमहांतमुतमानोअर्भकंमानउक्षन्तमुतमानं-उक्षितम् । मानोवधीः पितरंमोत मातरंप्रियामानस्तनुवो-रुद्ररीरिषः । मानस्तोकेतनये मानआयुंषिमानोगोषुमानोअश्वेषु-रीरिषः । वीरान्मानोरुद्रभामितोवधीर्हविष्मंतोनमसाविधेमते । प्रजापतेनत्वदेतान्यन्योविश्वाजातानिपरिता बभूव । यत्कामास्ते-जुहुमस्तन्नोअस्तुवयᳬस्यामपतयोरयीणाम् । स्वस्तिदाविशस्पति वृत्रहाविमृधोवशी । वृषेंद्रःपुरएतुनःस्वस्तिदाअभयंकरः । त्र्यंबकं-यजामहेसुगंधिंपुष्टिवर्धनम् । उर्वारुकमिवबंधनान्मृत्योर्मुक्षीय-मामृतात् । येतेसहस्रमयुतंपाशान्मृत्योमर्त्यायहंतवे । तान्य-ज्ञस्यमाययासर्वानवयजामहे मृत्यवेस्वाहामृत्यवेस्वाहा ओं नमो भगवतेरुद्राय विष्णवे मृत्योर्मेपाहि ॥

हरिः ॐ अग्नाविष्णूसजोषसेमावर्धंतुवांगिरः । द्युम्नैर्वा-जेभिरागतम् । वाजश्चमेप्रसवश्चमेप्रयतिश्चमे प्रसितिश्चमेधीति-श्चमे क्रतुश्चमेस्वरश्चमेश्लोकश्चमे श्रावश्चमेश्रुतिश्चमेज्योतिश्चमे सुवश्चमेप्राणश्चमेऽपानः (१) चमेव्यानश्चमेऽसुश्चमेचित्तंचमआधी-तंचमे वाक्चमे मनश्चमेचक्षुश्चमेश्रोत्रंचमे दक्षश्चमेबलंचमओज-श्चमे सहश्चमआयुश्चमे जराचमआत्माचमेतनूश्चमेशर्मचमे-वर्मचमेऽङ्गानिचमेऽस्थानिचमेपरूᳬषिचमेशरीराणिचमे ॥ १ ॥

ॐ ज्यैष्ठ्यंचमआधिपत्यंचमेमन्युश्चमेभामश्चमेऽमश्चमेऽम्भश्चमे-जेमाचमेमहिमाचमे वरिमाचमे प्रथिमाचमे वर्ष्माचमेद्राघुया-चमेवृद्धंचमेवृद्धिश्चमेसत्यंचमेश्रद्धाचमेजगच्च(१)मेधनंचमेवशश्चमेत्विषि-श्चमेक्रीडाचमेमोदश्चमेजातंचमेजनिष्यमाणंचमेसूक्तं चमेसुकृतंचमे वित्तंचमे वेद्यंचमे भूतंचमेभविष्यच्चमे सुगंचमे सुपथंचमऋद्धंचम-ऋद्धिश्चमे क्लृप्तंचमेक्लृप्तिश्चमे मतिश्चमे सुमतिश्चमे ॥ २ ॥ २ ॥

ॐशंचमेमयश्चमेप्रियंचमेऽनुकामश्चमेकामश्चमेसौमनसश्चमे भद्रं-चमे श्रेयश्चमे वस्यश्चमे यशश्चमे भगश्चमे द्रविणंचमेयंताचमे धर्ताचमेक्षेमश्चमे धृतिश्चमे विश्वंच (१) मेमहश्चमेसंविच्चमे ज्ञात्रं-चमे सूश्चमेप्रसूश्चमे सीरंचमे लयश्चमऋतंचमेऽमृतंचमेऽयक्ष्मंचमेऽनाम-यच्चमे जीवातुश्चमे दीर्घायुत्वंचमेऽनमित्रंचमेऽभयंचमेसुगंचमेशयनं-चमेसूषाचमे सुदिनंचमे ॥ २ ॥ ३ ॥

ॐ ऊर्क्चमे सूनृताचमेपयश्चमेरसश्चमे घृतंचमे मधुचमे सग्धिश्चमेसपीतिश्चमे कृषिश्चमेवृष्टिश्चमेजैत्रंचमऔद्भिद्यंचमेरयिश्चमेरा-यश्चमे पुष्टंचमेपुष्टिश्चमे विभुच(१) मे प्रभुचमे बहुचमे-

भूयंश्चमे पूर्णंचमे पूर्णतरंचमेऽक्षितिश्चमेकूयवाश्चमेऽन्नंचमेक्षुच्चमेव्रीह-
यश्चमेयवाश्चमेमाषाश्चमे तिलाश्चमे मुद्गाश्चमे खल्वाश्चमेगोधुमाश्चमे-
मसुराश्चमेप्रियङ्गवश्चमेऽणवश्चमेश्यामाकाश्चमे नीवाराश्चमे ॥ २ ॥ ४ ॥

ॐ अश्माचमे मृत्तिकाचमे गिरयश्चमे पर्वताश्चमे सिकताश्च-
मेवनस्पतयश्चमे हिरण्यंचमेऽयश्चमेसीसंचमेत्रपुश्चमेश्यामंचमे लोहं-
चमेऽग्निश्चम आपश्चमेवीरुधश्चमओषधयश्चमे कृष्टपच्यंचं (१)
मेऽकृष्टपच्यंचमेग्राम्याश्चमेपशवआरण्याश्चयज्ञेनकल्पन्तांवित्तंचमेवित्ति-
श्चमे भूतंचमेभूतिश्चमे वसुचमेवसतिश्चमे कर्मचमेशक्तिश्चमेऽर्थश्चम-
एमश्चमइतिश्चमेगतिश्चमे ॥ २ ॥ ५ ॥

ॐ अग्निश्चमइंद्रश्चमे सोमश्चम इंद्रश्चमेसविताचमइंद्रश्चमे-
सरस्वतीचमइंद्रश्चमे पूषाचमइंद्रश्चमे बृहस्पतिश्चम इंद्रश्चमेमि-
त्रश्चमइंद्रश्चमे वरुणश्चमइंद्रश्चमे त्वष्टाच ( १ ) मइंद्रश्चमेधाता
चमइंद्रश्चमे विष्णुश्चमइंद्रश्चमेऽश्विनौचमइंद्रश्चमे मरुतश्चमइंद्रश्चमे-
विश्वेचमेदेवाइंद्रश्चमेपृथिवीचमइंद्रश्चमेऽन्तरिक्षंचमइंद्रश्चमे द्यौश्चम-
इन्द्रश्चमे दिशश्चमइन्द्रश्चमेमूर्धाचमइन्द्रश्चमे प्रजापतिश्चमइन्द्र-
श्चमे ॥ २ ॥ ६ ॥

ॐ अꣳशुश्च मे रश्मिश्च मेऽदाभ्यश्च मेऽधिपतिश्च म उपाꣳशुश्च मेऽन्तर्यामश्च म ऐन्द्रवायवश्च मे मैत्रावरुणश्च म आश्विनश्च मे प्रतिप्रस्थानश्च मे शुक्रश्च मे मन्थी च म आग्रयणश्च मे वैश्वदेवश्च मे ध्रुवश्च मे वैश्वानरश्च म ऋतुग्रहाश्च (१) मेऽतिग्राह्याश्च म ऐन्द्राग्नश्च मे वैश्वदेवश्च मे मरुत्वतीयाश्च मे माहेन्द्रश्च म आदित्यश्च मे सावित्रश्च मे सारस्वतश्च मे पौष्णश्च मे पात्नीवतश्च मे हारियोजनश्च मे ॥ २ ॥ ७ ॥

ॐ इध्मश्च मे बर्हिश्च मे वेदिश्च मे धिष्णियाश्च मे स्रुचश्च मे चमसाश्च मे ग्रावाणश्च मे स्वरवश्च म उपरवाश्च मेऽधिषवणे च मे द्रोणकलशश्च मे वायव्यानि च मे पूतभृच्च म आधवनीयश्च म आग्नीध्रं च मे हविर्धानं च मे गृहाश्च मे सदश्च मे पुरोडाशाश्च मे पचताश्च मेऽवभृथश्च मे स्वगाकारश्च मे ॥ १ ॥ ८ ॥

ॐ अग्निश्च मे घर्मश्च मेऽर्कश्च मे सूर्यश्च मे प्राणश्च मेऽश्वमेधश्च मे पृथिवी च मे दितिश्च मेऽदितिश्च मे द्यौश्च मे शक्करीरङ्गुलयो दिशश्च मे यज्ञेन कल्पन्तामृक् च मे साम च मे स्तोमश्च मे यजुश्च मे दीक्षा च मे तपश्च म ऋतुश्च मे व्रतं च मेऽहोरात्रयोर्वृष्ट्या बृहद्रथन्तरे च मे यज्ञेन कल्पेताम् ॥ १ ॥ ९ ॥

ॐ गर्भाश्च मे वत्साश्च मे त्र्यविश्च मे त्र्यवी च मे दित्यवाट् च-

मेदित्यौहीचमे पंचाविश्चमे पंचावीचमे त्रिवत्सश्चमे त्रिवत्साचमे
तुर्यवाट्चमेतुर्यौहीचमेपष्ठवाच्चमे पष्ठौहीचमउक्षाचमेवशाचमऋषभश्च
( १ ) मेवेहच्चमेऽनड्वांचमे धेनुश्चमआयुर्यज्ञेनकल्पतांप्राणोयज्ञेनकल्प-
तामपानो यज्ञेनकल्पतांव्यानो यज्ञेनकल्पतांचक्षुर्यज्ञेन कल्पताँऽश्रोत्रं-
यज्ञेनकल्पतां मनोयज्ञेनकल्पतां वाग्यज्ञेन कल्पतामात्मायज्ञेनकल्पतां
यज्ञोयज्ञेन कल्पताम् ॥ १ ॥ १० ॥

ॐ एकाचमे तिस्रश्चमे पंचचमेसप्तचमेनवचमएकादशचमे
त्रयोदशचमे पंचदशचमे सप्तदशचमेनवदशचमएकविंशतिश्चमेत्रयो-
विंशतिश्चमे पंचविंशतिश्चमे सप्तविंशतिश्चमेनवविंशतिश्चमएकत्रि-
ंशच्चमे त्रयस्त्रिंशच्च ( १ ) मे चतस्रश्चमेऽष्टौचमे द्वादशचमेषोडश-
चमे विंशतिश्चमे चतुर्विंशतिश्चमेऽष्टाविंशतिश्चमे द्वात्रिंशच्चमे
षट्त्रिंशच्चमे चत्वारिंशच्चमेचतुश्चत्वारिंशच्चमेऽष्टाचत्वारिंशच्चमे
वाजश्चप्रसवश्चापिजश्चक्रतुश्चसुवश्चमूर्धाचव्याश्नियश्च ( २ ) आंत्यायन-
श्चांत्यश्च भौवनश्च भुवनश्चाधिपतिश्च ॥ २ ॥ ११ ॥

ॐ इडादेवहूर्मनुर्यज्ञनी बृहस्पतिरुक्थामदानिशंसिषद्विश्वे-
देवाःसूक्तवाचः पृथिविमातर्मामाहिंसीर्मधुमनिष्येमधुजनिष्येमधु-
वक्ष्यामि मधुवदिष्यामि मधुमतींदेवेभ्योवाचमुद्यासंशुश्रूषेण्यां

मनुष्येभ्यस्तंमादेवाअवंतु शोभायैपितरोऽनुमदंतु ॥ ॐ सहनाववतु ॥ सहनौ भुनक्तु ॥ सहवीर्यं करवावहै तेजस्विनावधीतमस्तु माविद्विषावहै ॥ ॐ शान्तिः शान्तिः शान्तिः ॥ अग्नाविष्णूज्यैष्ठ्यश्शंचोर्क्चाश्माचाग्निश्चाश्शुश्चेध्मश्चाग्निश्चघर्मोगभश्चिकाच ॥

रुद्राभिषेकानंतरं पुरुषसूक्तेन इतरसूक्तैकैकवर्गेण ऋचावाभिषेकः ॥

ॐ सहस्रशीर्षेत्यस्य मंत्रस्य नारायणः पुरुषोनुष्टुप् अभिषेके विनियोगः ॥

ॐ सहस्रशीर्षापुरुषस्सहस्राक्षस्सहस्रपात् । सभूमिं विश्वतोवृत्वात्यतिष्ठद्दशांगुलम् ॥ १ ॥ पुरुषएवेदंसर्वं यद्भूतं यच्चभव्यं । उतामृं तत्वस्येशानोयदन्नेनातिरोहति ॥ २ ॥ एतावानस्यमहिमातोज्यायांश्च पूरुषः । पादोस्यविश्वाभूतानि त्रिपादस्यामृतं दिवि ॥ ३ ॥ त्रिपादूर्ध्वउदैत्पुरुषः पादोस्येहाभवत्पुनः । ततोविष्वङ्व्यक्रामत्साशनानशनेअभि ॥ ४ ॥ तस्माद्विराळजायत विराजोअधिपूरुषः । सजातो अत्यरिच्यत पश्चाद्भूमिमथोपुरः ॥ ५ ॥ यत्पुरुषेण हविषा देवायज्ञमतन्वत । वसंतोअस्यासीदाज्यं ग्रीष्मइध्मःशरद्धविः ॥ ६ ॥ तंयज्ञं बर्हिषिप्रौक्षन्पुरुषं जातमग्रतः । तेन देवाअयजंतसाध्याऋषयश्चये ॥ ७ ॥

तस्माद्यज्ञात्सर्वहुतःसंभृतंपृषदाज्यम् । पशून्तांश्चक्रे वायव्यानारण्यान्ग्राम्याश्चये ॥ ८ ॥ तस्माद्यज्ञात्सर्वहुतऋचः सामानि जज्ञिरे । छंदांसि जज्ञिरेतस्माद्यजुस्तस्मादजायत ॥ ९ ॥ तस्मादश्वाअजायंत येकेचोभयादतः । गावोहजज्ञिरे तस्मात्तस्माज्जाताअजावयः ॥ १० ॥ यत्पुरुषंव्यदधुः कतिधा व्यकल्पयन् । मुखंकिमस्यकौबाहूकाऊरूपादाउच्येते ॥ ११ ॥ ब्राह्मणोस्यमुखमासीद्बाहूराजन्यः कृतः । ऊरूतदस्ययद्वैश्यः पद्भ्यां शूद्रोअजायत ॥ १२ ॥ चंद्रमामनसोजातश्चक्षोःसूर्यो अजायत । मुखादिंद्रश्चाग्निश्चप्राणाद्वायुरजायत ॥ १३ ॥ नाभ्याआसीदन्तरिक्षंशीर्ष्णोद्यौः समवर्तत । पद्भ्यांभूमिर्दिशः श्रोत्रात्तथा लोकाँअकल्पयन् ॥ १४ ॥ सप्तास्यासन्परिधयस्त्रिःसप्तसमिधः कृताः । देवायद्यज्ञंतन्वाना अबध्नन् पुरुषं पशुं ॥ १५ ॥ यज्ञेनयज्ञमयजंतदेवास्तानिधर्माणि प्रथमान्यासन् । तेहनाकं महिमानःसचंतयत्रपूर्वेसाध्याःसंतिदेवाः ॥ १६ ॥ इति पुरुषसूक्तम् ॥

ॐ अतोदेवाअवंतुनो यतोविष्णुर्विचक्रमे । पृथिव्यास्सप्तधामभिः ॥ १ ॥ ॐ अयंतेअस्तुहर्यतः सोमआहरिभिःसुतः जुषाणइन्द्रहरिभिर्नआगह्यातिष्ठहरितंरथम् ॥ १ ॥ ॐ अस्यवामस्यपलितस्यहोतुस्तस्य भ्रातामध्यमो अस्त्यश्नः । तृतीयो-

भ्राता घृतपृष्टोअस्यात्रापश्यंविश्पतिं सप्तपुत्रम् ॥ १ ॥ ॐ स्वादि-
ष्ठयामदिष्ठयापवस्वसोमधारया । इंद्राय पातवेसुतः ॥ १ ॥
ॐ सोमःपुनानो अर्षतिसहस्त्रधारो अत्यविः । वायोरिंद्रस्यनि-
ष्कृतम् ॥ १ ॥ ॐ प्रणइंदोमहेतनं ऊर्मिनभिभ्रंदर्षसि । अभिदेवाँ-
अयास्यः ॥ १ ॥ ॐ हिन्वंतिसूरमुस्रयः स्वसारोजामयस्पतिं ।
महामिंदुमहीयुवः ॥ १ ॥ ॐ पावमानं परंब्रह्म ये पठन्ति
मनीषिणः । सप्तजन्मभवेद्विप्रो धनाढ्योवेदपारगः ॥ १ ॥
दशोत्तराण्यृचांश्चैव पावमानीःशतानिषद् । एतज्जुहन् जपेन्मंत्रंघोर-
मृत्युभयंहरेत् ॥ १ ॥ ॐ आनोभद्राः क्रतवोयंतुविश्वतोऽदब्धासो
अपरीतासउद्भिदः । देवानोयथासदमिद्वृधे असन्नप्रायुवोरक्षितारो-
दिवेदिवे ॥ १ ॥ ॐ हंसःशुचिषद्वसुरंतरिक्षसद्धोतावेदिषदतिथिर्दुरो-
णसत् । नृषद्वरसदृतसद्व्योमसदब्जागो जाऋतजा अद्रिजाऋतम् ॥१॥

## ॥ अथ श्रीसूक्तम् ॥

ॐ हिरण्यवर्णां हरिणींसुवर्णरजतस्रजाम् । चंद्रांहिरण्मयीं-
लक्ष्मीं जातवेदो ममावह ॥ १ ॥ ताम्मआवहजातवेदोलक्ष्मीमन-
पगामिनीम् । यस्यांहिरण्यं विंदेयंगामश्वं पुरुषानहम् ॥ २ ॥
अश्वपूर्वां रथमध्यां हस्तिनादप्रबोधिनीं । श्रियंदेवी मुपह्वयेश्री-

मांदेवीर्जुषतां ॥ ३ ॥ कांसोस्मितां हिरंण्यप्राकारांमार्द्रां ज्वलंन्तीम् तृप्तां तर्पयंन्तीम् । पद्मेस्थितां पद्मवर्णां तामिहोपंह्वयेश्रियंम् ॥ ४ ॥ चंद्रां प्रंभासां यशसाज्वलंन्तीम् श्रियंलोके देवजुंष्टामुदाराम् । तां पद्मिनीमीं शरंणमहं प्रपंद्ये अलक्ष्मीर्मेनश्यतांत्वांवृंणोमि ॥ ५ ॥ आदित्यवर्णे तपसोधिंजातो वनस्पतिस्तव वृक्षोऽथंबिल्वः । तस्य फलांनि तपसानुदंतु मायांतरायाश्चंबाह्याअंलक्ष्मीः ॥ ६ ॥ उपैतु मां देवसखः कीर्तिश्च मणिंना सह । प्रादुर्भूतोस्मिराष्ट्रेऽस्मिन्कीर्तिंवृद्धिं ददातुमे ॥ ७ ॥ क्षुत्पिंपासामंलां ज्येष्ठामलक्ष्मीं नांशयाम्यहंम् । अभूंतिमसंमृद्धिंच सर्वांनिर्णुदमेगृहात् ॥ ८ ॥ गंधद्वारांदुराधर्षां नित्यपुंष्टांकरीषिणींम् । ईश्वरीं सर्वंभूतानां तामिहोपंह्वये श्रियंम् ॥ ९ ॥ मनंसः काममाकूंतिं वाचस्सत्यमंशीमहि । पशूनांरूपं मन्नस्यमयिश्रीः श्रंयतां यशंः ॥ १० ॥ कर्दमेन प्रंजा भूतामयिसंभवकर्दंम । श्रियंवासयमेकुले मातरंपद्ममालिंनीम् ॥ ११ ॥ आपंः स्रजंतु स्निग्धानि चिक्लीतवसमेगृहे । नीचदेवीं मातरांश्रियं वासयंमेकुले ॥ १२ ॥ आर्द्रां पुष्करिंणीं पुष्टिं पिंगलांपद्ममालिंनीम् । चंद्रां हिरण्मंयीं लक्ष्मीं जातवेदो ममावंह । ॥ १३ ॥ आर्द्रां यःकरिंणीं यष्टिं सुवर्णां हेममालिंनीम् । सूर्यांहिरण्मंयीं लक्ष्मीं जातवेदोममावंह ॥ १४ ॥ तांमआवंह जात-

वेदो लक्ष्मीमनपगामिनीम् । यस्यां हिरण्यं प्रभूतं गावोदास्योऽ-
श्वान्विदेयं पुरुषानहम् ।। १५ ।। यः शुचिः प्रयतो भूत्वा जुहुयां-
दाज्यमन्वहम् । श्रियः पंचदशर्चंच श्रीकामस्सततं जपेत् ।। १६ ।।
पद्मानने पद्मिनिपद्मपत्रे पद्मप्रियेपद्मदलायताक्षी । विश्वप्रियेविश्व
मनूनकूले त्वत्पादपद्मं मयिसन्निधत्स्व ।। १७ ।। पद्मानने पद्म-
ऊरू पद्माक्षीपद्मसंभवे । तन्मेभजसि पद्माक्षी येनसौख्यंलभा-
म्यहम् ।। १८ ।। अश्वदायी गोदायी धनदायी महाधने । धनं मे
लभतां देवि सर्वकामांश्च देहिमे ।। १९ ।। पुत्रपौत्रधनं धान्यं
हस्त्यश्वादि गवेरथम् । प्रजानां भवसीमाता आयुष्मंतं करोतु मे
।। २० ।। धनमग्निर्धनंवायुर्धनंसूर्यो धनंवसुः । धनमिंद्रो बृहस्पति
र्वरुणं धनमश्विना ।। २१ ।। वैनतेयसोमं पिबसोमंपिबतु वृत्रहा ।
सोमं धनस्य सोमिनो मह्यं ददातु सोमिनः ।। २२ ।। नक्रोधो
नच मात्सर्यं न लोभोनाशुभामतिः । भवंति कृतपुण्यानां भक्ता
नांश्रीसूक्तं जपेत् ।। २३ ।। सरसिजनिलये सरोजहस्ते धवलतरां
शुभगंधमाल्यशोभे । भगवति हरिवल्लभे मनोज्ञे त्रिभुवन
भूतिकरिप्रसीद मह्यम् ।। २४ ।। विष्णुपत्नीं क्षमां देवीं माधवीं
माधवप्रियां । लक्ष्मीं प्रियसखीं देवीं नमाम्यच्युत वल्लभाम् ।। २५ ।।
महालक्ष्म्यैच विद्महे विष्णुपत्न्यैच धीमहि । तन्नो लक्ष्मीः प्रचो-

दयात् ॥ २६ ॥ आनंदकर्दमः श्रीतश्चिक्लीत इव विश्रुतः । ऋषयः श्रियं पुत्रांश्च श्रीर्देवीर्देवीदेवता । चंद्राभां श्रियमीशानां सूर्याभां श्रियमीश्वरीम् ॥ चंद्रसूर्याग्निसंकाशां श्रियं लक्ष्मीमुपास्महे ॥ श्रीवर्चस्वमायुष्यमारोग्यमाविधाच्छुभमानंमहीयते । धनं धान्यं पशुंबहुपुत्रलाभं शतसंवत्सरं दीर्घमायुः । ऋणंरोगश्च दारिद्र्यंपापक्षुदपमृत्यवः । भयं शोकमनस्तापान् नश्यंतुममसर्वदा ॥

॥ इति श्रीसूक्तम् ॥

ॐ एकदंताय विद्महे वक्रतुंडायधीमहि । तन्नो दंतिः प्रचोदयात् ॥ १ ॥ ॐ तत्पुरुषाय विद्महे महादेवाय धीमहि । तन्नो रुद्रः प्रचोदयात् ॥ २ ॥ ॐ कात्यायनायविद्महे *कन्याकुमार्यैधीमहि । तन्नो दुर्गिः प्रचोदयात् ॥ ३ ॥ ॐ नारायणायविद्महे वासुदेवाय धीमहि । तन्नो विष्णुः प्रचोदयात् ॥ ४ ॥ ॐ भास्कराय विद्महे महद्द्युतिकराय धीमहि । तन्नो आदित्यः प्रचोदयात् ॥ ५ ॥

ॐ तच्छंयोरावृणीमहे । गातुं यज्ञाय । गातुं यज्ञपतये । दैवीस्वस्तिरस्तु नः । स्वस्तिर्मानुषेभ्यः । ऊर्ध्वंजिगातु भेषजम् । शंनो अस्तु द्विपदे । शंचतुष्पदे । ॐ शांतिः शांतिः शांतिः । ॐ नमो ब्रह्मणे नमो अस्त्वग्नये नमः पृथिव्यै नम ओषधीभ्यः ॥

---

*पाठभेदः—कन्यकुमारि

नमो वाचे नमो वाचस्पतये नमो विष्णवे महते करोमि ब्रह्म-भूर्भुवस्स्वरोम् शांतिः शांतिः शांतिः ॥

अभिषेकानंतरं वस्त्रेण परिमार्ज्य ॥

ग्रहावैप्रतिष्ठासूक्तं तत्प्रतिष्ठिततमया वाचा शंस्तव्यं तस्माद्यद्यपिदूरइवपशूँल्लभतेग्रहानेवै नानाजिगामिषातिग्रहाहिपशूनां-प्रतिष्ठा प्रतिष्ठा सुप्रतिष्ठितमस्तु ॥

इति देवं पीठे प्रतिष्ठापयेत् ॥

ॐ युवं वस्त्राणि पीवसावसाथेयुवोरच्छिद्रामंतवोहसर्गाः । अवांतिरतमनृतानिविश्वंऋतेन मित्रावरुणासचेथे ॥ वस्त्रयुग्मं समर्पयामि ॥ ॐ यज्ञोपवीतं परमं पवित्रं प्रजापतेर्यत्स-हजं पुरस्तात् । आयुष्यमग्र्यं प्रतिमुंच शुभ्रं यज्ञोपवीतं बलमं-स्तुतेजः ॥ उपवीतं समर्पयामि ॥ गंधद्वारां दुराधर्षां नि० ॥ गंधं समर्पयामि ॥ अर्चत प्रार्चत प्रियमेधासो अर्चत अर्चंतु पुत्रका उतपुरंनधृष्ण्वर्चत ॥ अक्षतान् समर्पयामि । सेवंतिकाबकुलचंपकपाटलाब्जैः पुन्नागजाजिकरवीररसालपुष्पैः । बिल्वप्रवाळतुलसीदलमालिकाभिस्त्वां पूजयामि जगदीश्वर मे प्रसीद ॥ पत्रपुष्पाणि समर्पयामि ॥

द्वारपालपूजां करिष्ये ॥

धात्रे नमः ॥ विधात्रे नमः ॥ पूर्वद्वारे द्वारश्रियै नमः ॥ चंडाय नमः ॥ प्रचंडाय नमः ॥ दक्षिणद्वारे द्वारश्रियै नमः ॥

जयाय नमः ॥ विजयाय नमः ॥ पश्चिमद्वारे द्वारश्रियै नमः ॥ शंखनिधये नमः ॥ पुष्पनिधये नमः ॥ उत्तरद्वारे द्वारश्रियै नमः ॥ दुर्गायै नमः ॥ विघ्नेश्वराय नमः ॥

इति द्वारपालपूजां समर्पयामि ॥ पीठपूजां करिष्ये ॥

आधारशक्त्यै नमः ॥ मूलप्रकृत्यै नमः ॥ कूर्माय नमः ॥ अनंताय नमः ॥ ब्रह्मणे नमः ॥ वास्तुपुरुषाय नमः ॥ श्वेतच्छत्राय नमः ॥ रत्नद्वीपाय नमः ॥ मणिमंटपाय नमः ॥ कल्पवृक्षाय नमः ॥ धर्माय नमः ॥ ज्ञानाय नमः ॥ वैराग्याय नमः ॥ ऐश्वर्याय नमः ॥ अधर्माय नमः ॥ अज्ञानाय नमः ॥ अवैराग्याय नमः ॥ अनैश्वर्याय नमः ॥ अव्यक्तात्मने चित्रकंदाय नमः ॥ बुध्यात्मने नाळाय नमः ॥ अहंकारात्मने बीजाय नमः ॥ आकाशात्मने कर्णिकायै नमः ॥ यं वाय्वात्मने केसराय नमः ॥ रं वह्न्यात्मने दळाय नमः ॥ वं जलात्मने दळाग्राय नमः ॥ लं पृथिव्यात्मने परिवेषाय नमः ॥ अं अर्कमंडलाय अर्थप्रदद्वादश-कलात्मने नमः ॥ उं सोममंडलाय कामप्रद् षोडशकलात्मने नमः ॥ मं वह्निमंडलाय धर्मप्रददशकलात्मने नमः ॥ सं सत्वाय नमः ॥ रं रजसे नमः ॥ तं तमसे नमः ॥ मं मायायै नमः ॥ विं विद्यायै नमः ॥ पं पद्माय नमः ॥ अं आत्मने नमः ॥ उं अंतरात्मने नमः ॥ मं परमात्मने नमः ॥ ऱ्हीं ज्ञानात्मने नमः ॥ इति पीठपूजां समर्पयामि ॥

॥ अथ पंचायतनपूजां करिष्ये ॥


आदित्यमंबिकां विष्णुं गणनाथं महेश्वरम् ।
पंचयज्ञपरो नित्यं पंचमूर्तीः प्रपूजयेत् ॥

## ॥ अथ पंचायतनपंचकम् ॥

### ॥ विष्णुपंचायतनम् ॥

विष्णुर्मध्ये शिवेभास्य सूर्यार्या ईशादिक्क्रमात् ॥


नाशंगरदे




### ॥ शिवपंचायतनम् ॥

शंभौ मध्ये विष्णुसूर्यगजास्यार्यास्तथा क्रमात् ॥

शंनारगदे



## ॥ शक्तिपंचायतनम् ॥

मध्ये देवीविष्णुशिवगणेशरवयः क्रमात् ॥


देनाशंगर

| | | |
|---|---|---|
| ना. | | शं. |
| | दे. | |
| र. | | ग. |

## ॥ गणपतिपंचायतनम् ॥

मध्ये गणपतिर्विष्णुशिवसूर्याम्बिकास्तथा ॥


गनाशंरदे



## ॥ सूर्यपंचायतनम् ॥

रवौ मध्यगते रुद्रगणेशाच्युतशक्तयः ॥

रशंगनादे




ईशानादिक्रमेणैव पंचायतनपंचकम् ॥ करिष्यमाणपूजायां निर्विघ्नतासिध्यर्थे श्रीमहागणपतिपूजां करिष्ये ॥

गणानां त्वा शौनको गृत्समदो गणपतिर्जगती गणपत्यावाहने विनियोगः ॐ गणानां त्वागणपतिं हवामहे कविंकवीनामुपमश्रवस्तमम् । ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आनःशृण्वन्नूतिभिस्सीदसादनम् । ऋद्धि बुद्धि सिद्धि सहितं भूः गणपतिमावाहयामि ॥ भुवः गणपतिमावाहयामि ॥ सुवः गणपतिमावाहयामि ॥ भूर्भुवस्सुवः गणपतिमावाहयामि ॥

## ॥ नवशक्तिपूजां करिष्ये ॥

तीव्रायै नमः ॥ ज्वालिन्यै नमः ॥ नंदायै नमः ॥ भोगदायै नमः ॥ कामरूपिण्यै नमः ॥ उग्रायै नमः ॥ तेजोवत्यै नमः ॥

सत्यायै नमः ।। विघ्ननाशिन्यै नमः ।। ॐ नमो भगवते सकल-गुणात्मने शक्तियुक्ताय श्रीमहागणाधीश्वराय योगाय योगपद्म-पीठात्मने नमः ।। स्वर्णपीठं कल्पयामि ।। स्वात्मसंस्थमजं शुद्धं त्वामद्य गणनायक ।। अरण्यामिव हव्याशं मूर्तावावाहयाम्यहम् ।। ॐ भूर्भुवस्स्वरों सशक्तिसांगसायुधसवाहनसपरिवारसर्वोपचारसहित-श्रीमहागणेशभगवन् अत्रैवागच्छागच्छ आवाहयिष्ये ।। आवाहितो भव ।। संस्थापितो भव ।। सन्निहितो भव ।। सन्निरुद्धो भव ।। अवकुंठितो भव ।। सुप्रसन्नो भव ।। पूजां गृहाण वरदो भव ।। क्षमस्व ।। सान्निध्यं कुरु ।। मम प्रसीद प्रसीद ।। ॐ एकदंताय विद्महे वक्रतुंडाय धीमहि । तन्नो दंतिः प्रचोदयात् ।। श्री महा-गणपतये अर्घ्यं समर्पयामि ।। गणक ऋषिः ।। निचृद्गायत्रीच्छंदः ।। श्रीमहागणपतिर्देवता ।। गां हृदयाय नमः ।। गीं शिरसे स्वाहा ।। गूं शिखायै वषट् ।। गैं कवचाय हूं ।। गौं नेत्रत्रयाय वौषट् ।। गः अस्त्रायफट् ।। ध्यानम् ।। रक्तो रक्तांगरागांशुककुसुमयुतस्तुंदिल-श्चंद्रमौळिर्नेत्रैर्युक्तस्त्रिभिर्वामनकरचरणो बीजपूरात्तनासः ।। हस्ता-ग्राक्लृप्तपाशांकुशरदवरदो नागवक्त्रोऽहिभूषो देवः पद्मासनस्थो भवतु नतसुरो भूतये विघ्नराजः ।। ॐ गं गणपतये नमः ।। जपं समर्पयामि ।। लं पृथिव्यात्मकं गंधं समर्पयामि ।। हं आकाशा-त्मकं पुष्पं समर्पयामि ।। यं वाय्वात्मकं धूपं समर्पयामि ।। रं वह्न्यात्मकं दीपं समर्पयामि ।। ठं अमृतात्मकं नैवेद्यं समर्पयामि ।। इति पंचोपचारैः संपूज्य ।। द्वादशनामपूजां करिष्ये ।।

सुमुखाय नमः ॥ एकदंताय नमः ॥ कपिलाय नमः ॥ गजकर्ण-काय नमः ॥ लंबोदराय नमः ॥ विकटाय नमः ॥ विघ्नराजाय नमः ॥ गणाधिपाय नमः ॥ धूमकेतवे नमः ॥ गणाध्यक्षाय नमः ॥ भालचंद्राय नमः ॥ गजाननाय नमः ॥ इति द्वादशनाम पूजां समर्पयामि ॥

॥ इति महागणपतिपूजा ॥

## ॥ श्री भवानीशंकरपूजां करिष्ये ॥

ॐ कद्रुद्राय प्रचेतसे मीढुष्टमाय तव्यसे । वोचेमशंतमंहृदे ॥ ॐ भूर्भुवस्स्वः श्रीभवानीशंकरमावाहयामि ॥ नवशक्तिपूजां करिष्ये ॥ वामायै नमः ॥ ज्येष्ठायै नमः ॥ रौद्र्यै नमः ॥ काल्यै नमः ॥ कलविकलिन्यै नमः ॥ बलविकलिन्यै नमः ॥ बलप्रमथिन्यै नमः ॥ सर्वभूतदमन्यै नमः ॥ मनोन्मन्यै नमः ॥ ॐ नमो भगवते सकलगुणात्मने शक्तियुक्ताय श्रीभवानीशंकराय योगाय योगपद्मपीठात्मने नमः ॥ स्वर्णपीठं कल्पयामि ॥ स्वात्मसंस्थ-मजं शुद्धं त्वामद्य परमेश्वर ॥ अरण्यामिव हव्याशं मूर्तावावाहया-म्यहम् ॥ ॐ भूर्भुवस्स्वरों सशक्तिसांगसायुधसवाहनसपरिवारश्री भवानीशंकर भगवन् अत्रैवागच्छागच्छ आवाहयिष्ये इत्यादि ॥ ॐ तत्पुरुषाय विद्महे महादेवाय धीमहि । तन्नो रुद्रः प्रचोदयात् ॥ श्रीभवानीशंकराय नमः ॥ प्रसन्नार्घ्यं समर्पयामि ॥ वामदेव-ऋषिः ॥ पंक्तिच्छंदः ॥ श्रीसदाशिवरुद्रो देवता ॥ ॐ हृदयाय नमः ॥ नं शिरसे स्वाहा ॥ मं शिखायै वषट् ॥ शिं कवचाय हूं ॥

वां नेत्रत्रयाय वौषट् ।। यः अस्त्रायफट् ।। अथ ध्यानम् ।। वंदे हरं वरदशूलकपालहस्तं साभीतिमद्रिसुतयोज्वलदेहकांत्या ।। वामोरुपीठगतया निजवामहस्तन्यस्तारुणोत्पलयुजा परिरब्धदेहम् ।। इति ध्यात्वा ।। लमित्यादि पंचोपचारैः संपूज्य ।।

## ।। अथावरणपूजां करिष्ये ।।

देवस्य पश्चिमे सद्योजाताय नमः ।। उत्तरे वामदेवाय नमः ।। दक्षिणे अघोराय नमः ।। पूर्वे तत्पुरुषाय नमः ।। ऊर्ध्वे ईशानाय नमः ।। प्रथमावरण पूजां समर्पयामि ।। द्वितीयावरण-पूजां करिष्ये ।। आग्नेय कोणे हृदयाय नमः ।। ईशान कोणे शिरसे स्वाहा ।। नैर्ऋत्य कोणे शिखायै वषट् ।। वायव्य कोणे कवचाय हूं ।। अग्रे नेत्रत्रयाय वौषट् ।। दिक्षु अस्त्राय फट् ।। तृतीयावरणपूजां करिष्ये ।। प्राच्यां अनंताय नमः ।। अवाच्यां सूक्ष्माय नमः ।। प्रतीच्यां शिवोत्तमाय नमः ।। उदीच्यां एक नेत्राय नमः ।। ईशान्यां एकरुद्राय नमः ।। आग्नेय्यां त्रैमूर्तये नमः ।। नैर्ऋत्यां श्रीकंठाय नमः ।। वायव्यां शिखंडिने नमः ।। इति तृतीयावरणं ।। चतुर्थावरणं करिष्ये ।। उत्तरदिग्दले उमायै नमः ।। ईशानदिग्दले चंडेश्वराय नमः ।। पूर्वदिग्दले नंदीश्वराय नमः ।। आग्नेयदिग्दले महाकाळाय नमः ।। दक्षिण-दिग्दले वृषभाय नमः ।। नैर्ऋत्यदिग्दले गणेश्वराय नमः ।। पश्चिमदिग्दले भृंगीशाय नमः ।। वायव्यदिग्दले महासेनाय नमः ।। पंचमावरणपूजां करिष्ये ।। इंद्राय नमः ।। अग्नये नमः ।।

यमाय नमः ॥ निर्ऋतये नमः ॥ वरुणाय नमः ॥ वायवे नमः ॥ कुबेराय नमः ॥ ईशानाय नमः ॥ ब्रह्मणे नमः ॥ अनंताय नमः ॥ इति पंचमावरणं ॥ षष्टावरणपूजां करिष्ये ॥ वज्राय नमः ॥ शक्तये नमः ॥ दंडाय नमः ॥ खड्गाय नमः ॥ पाशाय नमः ॥ अंकुशाय नमः ॥ गदायै नमः ॥ त्रिशूलाय नमः ॥ पद्माय-नमः ॥ चक्राय नमः ॥ इत्यावरणपूजां समर्पयामि ॥ अथ द्वादशनामपूजां करिष्ये ॥ महादेवाय नमः ॥ महेश्वराय नमः ॥ शंकराय नमः ॥ वृषभध्वजाय नमः ॥ कृत्तिवाससे नमः ॥ कामांगनाशनाय नमः ॥ देवदेवाय नमः ॥ श्रीकंठाय नमः ॥ हराय नमः ॥ पार्वतीपतये नमः ॥ श्रीरुद्राय नमः ॥ शिवाय नमः ॥ इति द्वादशनामपूजां समर्पयामि ॥

## ॥ दुर्गापूजां करिष्ये ॥

ॐ जातवेदसे सुनवामसोममरातीयतो निदहातिवेदः ॥ सनः पर्षदति दुर्गाणि विश्वानावेव सिंधुं दुरितात्यग्निः ॥ नवशक्तिपूजां करिष्ये ॥ आं प्रभायै नमः ॥ ईं मायायै नमः ॥ ऊं जयायै नमः ॥ एं सूक्ष्मायै नमः ॥ ऐं विशुद्धायै नमः ॥ ओं नंदिन्यै नमः ॥ औं सुप्रभायै नमः ॥ अं विजयायै नमः ॥ अः सर्वसिद्धिदायै नमः ॥ ॐ वज्रनखदंष्ट्रायुधाय महासिंहाय हूं नमः ॥ स्वात्मसंस्थामजां शुद्धां त्वामद्य परमेश्वरि ॥ अरण्यामिव हव्याशं मूर्तावावाहयाम्यहम् ॥ ॐ भूर्भुवस्स्वरों श्री दुर्गापरमेश्वरि अत्रैवागच्छागच्छ ॥ आवाहयिष्ये ॥ आवाहिता

भव ॥ संस्थापिता भव ॥ सन्निहिता भव ॥ सन्निरुद्धा भव ॥ समकुंठिता भव ॥ सुप्रसन्ना भव ॥ पूजां गृहाण वरदा भव ॥ क्षमस्व ॥ सान्निध्यं कुरु ॥ प्रसीद प्रसीद ॥ ॐ कात्यायनाय विद्महे कन्याकुमारीं धीमहि तन्नो दुर्गिः प्रचोदयात् ॥ प्रसन्नार्घ्यं समर्पयामि ॥ नारद ऋषिः ॥ गायत्री छंदः ॥ श्रीदुर्गापरमेश्वरी देवता ॥ ह्रां हृदयाय नमः ॥ ह्रीं शिरसे स्वाहा ॥ ह्रूं शिखायै वषट् ॥ ह्रैं कवचाय हूं ॥ ह्रौं नेत्रत्रयाय वौषट् ॥ ह्रः अस्त्राय फट् ॥ अथ ध्यानं ॥ शंखारिचापशरभिन्नकरां त्रिनेत्रां । तिग्मेतरांशुकलया विलसत्किरीटां ॥ सिंहस्थितां ससुरसिद्धनतां च दुर्गां । दूर्वानिभां दुरितदुर्गहरां नमामि ॥ लमित्यादि पंचोपचारैः संपूज्य ॥ द्वादशनामपूजां करिष्ये ॥ ॐ दुर्गायै नमः ॥ शांत्यै नमः ॥ चंडिकायै नमः ॥ शाकंभर्यै नमः ॥ भूतिदायिन्यै नमः ॥ नारायण्यै नमः ॥ भद्रकाल्यै नमः ॥ शिवदूत्यै नमः ॥ महालक्ष्म्यै नमः ॥ महामायायै नमः ॥ योगनिद्रायै नमः ॥ श्रीदुर्गापरमेश्वर्यै नमः ॥ इति द्वादशनामपूजां समर्पयामि ॥

## ॥ महाविष्णुपूजां करिष्ये ॥

ॐ इदं विष्णुर्विचक्रमे त्रेधानिदधे पदम् । समूढमस्यपांसुरे ॥ नवशक्तिपूजां करिष्ये ॥ विमलायै नमः ॥ उत्कर्षिण्यै नमः ॥ ज्ञानायै नमः ॥ क्रियायै नमः ॥ योगायै नमः ॥ सत्यायै नमः ॥ प्रव्ह्यै नमः ॥ ईशानायै नमः ॥ अनुग्रहायै

नमः ॥ ॐ नमो भगवते विष्णवे सर्वभूतात्मने वासुदेवाय सर्वात्मसंयोगपद्मपीठात्मने नमः ॥ स्वर्णपीठं कल्पयामि ॥ स्वात्मसंस्थमजं शुद्धं त्वामद्य पुरुषोत्तम ॥ अरण्यामिव हव्याशं मूर्तावावाहयाम्यहं ॥ ॐ भूर्भुवस्स्वरों सशक्तिसांगसायुधसवाहनसपरिवार श्रीमहाविष्णु भगवन्नत्रैवागच्छागच्छ ॥ आवाहयिष्ये आवाहितो भव ॥ संस्थापितो भव ॥ सन्निहितो भव ॥ सन्निरुद्धो भव ॥ समकुंठितो भव ॥ सुप्रसन्नो भव ॥ पूजां गृहाण वरदो भव ॥ ॐ नारायणाय विद्महे वासुदेवाय धीमहि तन्नो विष्णुः प्रचोदयात् ॥ श्री महाविष्णवे नमः ॥ प्रसन्नार्घ्यं समर्पयामि ॥ साध्यो नारायण ऋषिः ॥ देवीगायत्री छंदः ॥ परब्रह्मपरमात्मा देवता ॥ क्रुद्धोल्काय स्वाहा हृदयाय नमः ॥ महोल्काय स्वाहा शिरसे स्वाहा ॥ वीरोल्काय स्वाहा शिखायै वषट् ॥ द्युल्काय स्वाहा कवचाय हूं ॥ सहस्रोल्काय स्वाहा अस्त्राय फट् ॥ ध्यानम् ॥ शांताकारं भुजगशयनं पद्मनाभं सुरेशं ॥ विश्वाधारं गगनसदृशं मेघवर्णं शुभांगं ॥ लक्ष्मीकांतं कमलनयनं योगिभिर्ध्यानगम्यं ॥ वंदे विष्णुं भवभयहरं सर्वलोकैकनाथम् ॥ लमित्यादि पंचोपचारैः संपूज्य ॥ द्वादशनामपूजां करिष्ये ॥

केशवादि द्वादशनाममंत्रैः पूजां कुर्यात् ॥ इति महाविष्णुपूजा ॥

## ॥ आदित्यपूजां करिष्ये ॥

ॐ आकृष्णेन रजसावर्तमानो निवेशयन्नमृतं मर्त्यंच ॥

हिरण्ययेन सविता रथेनादेवोयाति भुवनानिपश्यन् ॥ अथ नवशक्तिपूजां करिष्ये ॥ दीप्तायै नमः ॥ सूक्ष्मायै नमः ॥ जयायै नमः ॥ भद्रायै नमः ॥ विभूत्यै नमः ॥ विमलायै नमः ॥ अमोघायै नमः ॥ विद्युतायै नमः ॥ सर्वतोमुख्यै नमः ॥ ॐ नमो भगवते सकलगुणात्मने शक्तियुक्ताय श्रीमदादित्याय योगपद्म पीठात्मने नमः ॥ स्वर्णपीठं कल्पयामि ॥ स्वात्मसंस्थमजं शुद्धं त्वामद्य श्रीदिवाकर ॥ अरण्यामिव हव्याशं मूर्तावावाहयाम्यहम् ॥ ॐ भूर्भुवस्स्वरों सशक्तिसांग सायुध श्रीमदादित्य भगवन् अत्रागच्छागच्छ ॥ आवाहयिष्ये ॥ इत्यादि ॥ क्षमस्व ॥ सान्निध्यं कुरु ॥ ॐ भास्कराय विद्महे महद्युतिकराय धीमहि तन्नो आदित्यः प्रचोदयात् ॥ इदमर्घ्यं समर्पयामि ॥ देवभाग ऋषिः ॥ पंक्तिछंदः ॥ श्रीमदादित्यो देवता ॥ सत्यतेजो ज्वालामणे हूं फट् स्वाहा हृदयाय नमः ॥ ब्रह्मतेजो ज्वालामणे० शिरसे स्वाहा ॥ रुद्रतेजो ज्वालामणे० शिखायै वषट् ॥ विष्णुतेजो ज्वालामणे० कवचाय हूं ॥ वह्नितेजो ज्वालामणे० नेत्रत्रयाय वौषट् ॥ सर्वतेजो ज्वालामणे० अस्त्राय फट् ॥ ध्यानम् ॥ शोणांभोरुहसंस्थितं त्रिनयनं वंदे त्रयीविग्रहम् ॥ दानांभोजयुगाभयानिदधतं हस्तैः प्रवाळप्रभं ॥ केयूरांगदहारकंकणधरं कर्णोल्लसत्कुंडलं ॥ लोकोत्पत्तिविनाशपालनकरं वंदे कराब्धि भजे ॥ इति ध्यात्वा लमित्यादि पंचोपचारैः संपूज्य ॥ द्वादशनामपूजां करिष्ये ॥ सहस्रकिरणाय नमः ॥ सूर्याय नमः ॥ तपनाय नमः ॥ सवित्रे नमः ॥ रवये नमः ॥ विकर्तनाय नमः ॥ जगच्च-

क्षुपे नमः ॥ द्युमणये नमः ॥ तिग्मतिद्युतये नमः ॥ द्वादशात्मकाय नमः ॥ त्रैमूर्तये नमः ॥ ब्रह्मविष्णुशिवात्मकाय नमः ॥

॥ इति द्वादशनामपूजां समर्पयामि ॥ इति पंचायतनपूजा ॥

## ॥ अथ शिवाष्टोत्तरशतं प्रारभ्यते ॥

पार्वत्युवाच ॥ अर्धासनं कथं शंभोः केन प्राप्स्यामि केशव ॥ तदिदानीं समाचक्ष्व स्तोत्रं शीघ्रफलप्रदम् ॥ नारायण उवाच ॥ अस्तिगुह्यतमं गौरि नाम्नामष्टोत्तरं शतं ॥ शंभोर्नाम प्रवक्ष्यामि सर्वकार्यार्थसिद्धये ॥ ॐ अस्य श्रीशिवाष्टोत्तरशत दिव्यनामामृतस्तोत्रमंत्रस्य नारायणऋषिः अनुष्टुप् छंदः श्री सदाशिवरुद्रो देवता श्रीसदाशिवप्रीत्यर्थे जपे विनियोगः ॥ अथ ध्यानम् ॥ ध्यायेन्नित्यं महेशं रजतगिरिनिभं चारुचंद्राव-तंसं ॥ रत्नाकल्पोज्वलांगं वरपरशुमृगाभीतिहस्तं प्रसन्नम् ॥ पद्मासीनं समंतात्स्तुतममरगणैर्व्याघ्रकृत्तिं वसानं ॥ विश्वाद्यं विश्ववंद्यं निखिलभयहरं पंचवक्त्रं त्रिनेत्रम् ॥ ओं नमश्शिवाय ॥ शिवो महेश्वरश्शंभुः पिनाकी शशिशेखरः ॥ वामदेवो विरूपाक्षः कपर्दी नीललोहितः ॥ १ ॥ शंकरः शूलपाणिश्च खट्वांगी विष्णुवल्लभः ॥ शिपिविष्टोऽम्बिकानाथः श्रीकंठो भक्तवत्सलः ॥ २ ॥ भवश्शर्वस्त्रिलोकेशः शितिकंठः शिवाप्रियः ॥ उग्रः कपाली कामारी रंधकासुरसूदनः ॥ ३ ॥ गंगाधरो ललाटाक्षः कालकालः कृपानिधिः ॥ भीमः परशुहस्तश्च मृगपाणिर्जटा धरः ॥ ४ ॥ कैलासवासी कवची कठोरस्त्रिपुरांतकः ॥ वृषांको

वृषभारूढो भस्मोद्धूलितविग्रहः ॥ ५ ॥ सामप्रियस्स्वरमयस्त्रयी-
मूर्तिरनीश्वरः ॥ सर्वज्ञः परमात्मा च सोमसूर्याग्निलोचनः ॥ ६ ॥
हविर्यज्ञमयस्सोमः पंचवक्त्रः सदाशिवः ॥ विश्वेश्वरो
वीरभद्रो गणनाथः प्रजापतिः ॥ ७ ॥ हिरण्यरेता दुर्धर्षो गिरीशो
गिरिशोऽनघः ॥ भुजंगभूषणो भर्गो गिरिधन्वा गिरिप्रियः ॥ ८ ॥
कृत्तिवासाः पुरारातिर्भगवान् प्रमथाधिपः ॥ मृत्युंजयस्सूक्ष्मतनु-
र्जगद्व्यापी जगद्गुरुः ॥ ९ ॥ व्योमकेशो महासेनजनकश्चारुविक्रमः ॥
रुद्रो भूतपतिः स्थाणुरहिर्बुध्नो दिगंबरः ॥ १० ॥
अष्टमूर्तिरनेकात्मा सात्विकः शुद्धविग्रहः ॥ शाश्वतः खंडपरशुःरजः
पाशविमोचनः ॥ ११ ॥ मृडः पशुपतिर्देवो महादेवोऽव्ययः
परः ॥ पूषदन्तभिदव्यग्रो दक्षाध्वरहरो हरः ॥ १२ ॥
भगनेत्रहृदव्यक्तस्सहस्राक्षस्सहस्रपात् ॥ अपवर्गप्रदोनंतस्तारक
परमेश्वरः ॥ १३ ॥ एककालंद्विकालं वा त्रिकालं नित्यमेव च ॥
जपेदष्टोत्तरशतं सद्गतिं लभते नरः ॥ १४ ॥

॥ इति श्रीशिवाष्टोत्तरशतं संपूर्णम् ॥

## ॥ अथ श्रीकृष्णाष्टोत्तरशतं प्रारभ्यते ॥

अस्य श्रीकृष्णाष्टोत्तरशतदिव्यनामामृतस्तोत्रमंत्रस्य शेष भगवान् ऋषिः । अनुष्टुप् छंदः । श्रीकृष्णः परमात्मा देवता । श्रीकृष्णप्रीत्यर्थे जपे विनियोगः ॥

### ॥ ध्या न म् ॥

बालाय नीलवपुषे नवकिंकिणीनां
जालाभिरामजघनाय दिगंबराय ॥

शार्दूलदिव्यनखभूषणभूषिताय
नंदात्मजाय नवनीतमुषे नमस्ते ॥ १ ॥

कुवलयदलनीलः कुंदमंदारमालः
कनकरुचिरचेलः कामिनीभृंगलोलः ॥
क्षितिधरधृतलीलः कंससंहारकालः
सकलभुवनपालः पातु गोपालबालः ॥ २ ॥

॥ इति ध्यानम् ॥

॥ शेष उवाच ॥

श्रीकृष्णः कमलानाथो वासुदेवस्सनातनः ॥
वसुदेवात्मजः पुण्यो लीलामानुषविग्रहः ॥ १ ॥

श्रीवत्सकौस्तुभधरो यशोदावत्सलो हरिः ॥
चतुर्भुजात्तचक्रासि गदाशंखाद्युदायुधः ॥ २ ॥

देवकीनंदनः श्रीशो नंदगोपप्रियात्मजः ॥
यमुनावेगसंहारी बलभद्रप्रियानुजः ॥ ३ ॥

पूतनाजीविताहारी शकटासुरभंजनः ॥
नंदव्रजजनानंदस्सच्चिदानंदविग्रहः ॥ ४ ॥

नवनीतविलिप्तांगो नवनीतनटोऽनघः ॥
नवनीतनवाहारो मुचुकुंदप्रसादकः ॥ ५ ॥

षोडशस्त्रीसहस्रेशस्त्रिभंगी मधुराकृतिः ॥
शुकवागमृताब्धींदुर्गोविंदो योगिनां पतिः ॥ ६ ॥

वत्सवाटचलोनंतो धेनुकासुरमर्दनः ॥
तृणीकृततृणावर्तो यमळार्जुनभंजनः ॥ ७ ॥

उत्ताळताळभेत्ता च तमालश्यामलाकृतिः ॥
गोपगोपीश्वरो योगी कोटिसूर्यसमप्रभः ॥ ८ ॥

इळापतिः परंज्योतिर्यादवेंद्रो यदूद्वहः ॥
वनमाली पीतवासाः पारिजातापहारकः ॥ ९ ॥

गोवर्द्धनाचलोद्धर्ता गोपालः सर्वपालकः ॥
अजो निरंजनः कामजनकः कंजलोचनः ॥ १० ॥

मधुहा मथुरानाथो द्वारकानायको बली ॥
वृंदावनांतसंचारी तुलसीदामभूषणः ॥ ११ ॥

स्यमंतकमणेर्हर्ता नरनारायणात्मकः ॥
कुब्जाकृष्टांबरधरो मायी परमपूरुषः ॥ १२ ॥

मुष्टिकासुरचाणूर मल्लयुद्धविशारदः ॥
संसारवैरिकंसारिर्मुरारिर्नरकांतकः ॥ १३ ॥

अनादिर्ब्रह्मचारी च कृष्णाव्यसनकर्षकः ॥
शिशुपालशिरश्छेत्ता दुर्योधनकुलांतकः ॥ १४ ॥

विदुराक्रूरवरदो विश्वरूपप्रदर्शकः ॥
सत्यवाक् सत्यसंकल्पः सत्यभामारतो जयी ॥ १५ ॥

सुभद्रापूर्वजोविष्णुर्भीष्ममुक्तिप्रदायकः ॥
जगद्गुरुर्जगन्नाथो वेणुनादविशारदः ॥ १६ ॥

वृषभासुरविध्वंसी बाणासुरकरांतकः ॥
युधिष्ठिरप्रतिष्ठाता बर्हिबर्हावतंसकः ॥ १७ ॥

पार्थसारथिरव्यक्तो गीतामृतमहोदधिः ॥
कालीयफणिमाणिक्यरंजितश्रीपदांबुजः ॥ १८ ॥

दामोदरो यज्ञभोक्ता दानवेंद्रविनाशनः ॥
नारायणः परब्रह्म पन्नगाशनवाहनः ॥ १९ ॥

जलक्रीडासमासक्त गोपीवस्त्रापहारकः ॥
पुण्यश्लोकस्तीर्थपदो वेदवेद्यो दयानिधिः ॥ २० ॥

सर्वतीर्थात्मकः सर्व ग्रहरूपी परात्परः ॥
एवं श्रीकृष्णदेवस्य नाम्नामष्टोत्तरं शतम् ॥ २१ ॥

कृष्णेन कृष्णभक्तेन श्रुत्वा गीतामृतं महत् ॥
स्तोत्रं कृष्णप्रियकरं कृतं तस्मान्मया पुरा ॥ २२ ॥

कृष्णनामामृतंनाम परमानंददायकम् ॥
अत्युपद्रवदुःखघ्नं बलमायुष्यवर्धनम् ॥ २३ ॥

दानं व्रतं तपस्तीर्थं यत्कृतं त्विहजन्मनि ॥
जपतां शृण्वतां चैव कोटिकोटिगुणं भवेत् ॥ २४ ॥

पुत्रप्रदमपुत्राणामगतीनां गतिप्रदम् ॥
धनावहं दरिद्राणां जयेप्सूनां जयावहम् ॥ २५ ॥

शिशूनां गोकुलानां च पुष्टिदं पूर्णपुण्यदम् ॥
बालरोगग्रहादीनां शमनं शांतिमुक्तिदम् ॥ २६ ॥

अंते कृष्णस्मरणदं भवतापभयापहम् ॥
कृष्णाय यादवेन्द्राय ज्ञानमुद्राय योगिने ॥ २७ ॥

नाथाय रुक्मिणीशाय नमो वेदांतवेदिने ॥
कृष्णंकमलपत्राक्षं पुण्यश्रवणकीर्तनम् ॥ २८ ॥

वासुदेवंजगद्योनिं नौमिनारायणंहरिम् ॥

॥ इति श्रीकृष्णाष्टोत्तरशतं संपूर्णम् ॥

वनस्पतिरसो धूपो गंधाढ्यो गंधउत्तमः ॥ आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृह्यताम् ॥ धूपं समर्पयामि ॥ आज्यं त्रिवर्तिसंयुक्तं वह्निना योजितं मया ॥ दीपं गृहाण देवेश त्रैलोक्यतिमिरापहम् ॥ भक्त्या दीपं प्रयच्छामि देवाय परमात्मने ॥ त्राहि मां नरकाद्घोराद्दीपज्योतिर्नमोऽस्तु ते ॥ इति दीपं समर्पयामि ॥

देवस्य पुरतश्चतुष्कोणमंडलं विलिख्य ॥ गंधपुष्पादिभिरभ्यर्च्य ॥ तदुपरि नैवेद्यपात्रं निधाय ॥ अस्त्रमंत्रेण प्रोक्ष्य ॥ अमृतीकरणार्थे धेनु मुद्रां प्रदर्श्य ॥

अन्नपूर्णे सदा पूर्णे शंकरप्राणवल्लभे ॥ ज्ञानवैराग्यसिध्यर्थं भिक्षां देहि च पार्वति ॥ इत्यनेन अन्नपूर्णां प्रार्थ्य ॥ ब्रह्मार्पणं ब्रह्महविर्ब्रह्माग्नौ ब्रह्मणा हुतम् ॥ ब्रह्मैव तेन गंतव्यं ब्रह्मकर्म समाधिना ॥ हरिर्दाता हरिर्भोक्ता हरिरन्नं प्रजापतिः ॥ हरिर्विप्र शरीरस्थो भोक्ता भोजयिता हरिः ॥ एको विष्णुर्महद्भूतं पृथग्भूता-न्यनेकशः ॥ त्रींल्लोकान् व्याप्य भूतात्मा भुंक्ते विश्वभुगव्ययः ॥

[ तर्जनीमध्यमांगुष्ठैः ] ॐ प्राणाय स्वाहा ॥
[ मध्यमानामिकांगुष्ठैः ] ॐ अपानाय स्वाहा ॥
[ कनिष्ठानामिकांगुष्ठैः ] ॐ व्यानाय स्वाहा ॥
[ कनिष्ठतर्जन्यंगुष्ठैः ] ॐ उदानाय स्वाहा ॥
[ पंचभिरंगुलीभिः ] ॐ समानाय स्वाहा ॥

इति प्राणादि पंचमुद्राः प्रदर्श्य ॥

चंद्रमा मनसो जातश्चक्षो० ॥ नैवेद्यं सम० ॥ स्वादुः

पवस्व दिव्याय० ॥ घंटां* वादयेत् ॥ नैवेद्यशेषं पार्षद्भ्यो दत्त्वा ॥ हस्तं प्रक्षाल्य ॥ करोद्वर्तनार्थे चंदनं समर्प्य ॥ फलेन फलितं सर्वं त्रैलोक्यं सचराचरम् ॥ तस्मात्फलप्रदानेन सफलोस्तु मनोरथः ॥ याः फलिनीर्या अ० ॥ फलनैवेद्यं समर्पयामि ॥ पूगीफलसमायुक्तं नागवल्लीदलैर्युतम् ॥ कर्पूरचूर्णसंयुक्तं तांबूलं प्रतिगृह्यताम् ॥ तांबूलं समर्पयामि ॥ हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः अनंतपुण्यफलदमतः शांतिं प्रयच्छ मे ॥ इति दक्षिणां स० ॥ श्रिये जात इति मंगलनीराजनम् ॥ ॐ श्रिये जातः श्रिय आनिरियाय श्रियं वयो जरितृभ्यो दधाति ॥ श्रियंवसाना अमृतत्वमायन् भवंति सत्याः समिथामितद्रौ ॥ श्रिय एवैनं तच्छ्रियामादधाति संततमृचावषट्कृत्यं ॥ संतत्यै संधीयते प्रजया पशुभिर्य एवंवेद ॥ मंगलनीराजनं ॥ हस्तौ प्रक्षाल्य ॥ कराभ्यां पत्रपुष्पाणि संगृह्य ॥ मंत्रान् पठेत् ॥ ॐ योनः पिता जनिता योविधाता धामानि वेद भुवनानि विश्वा ॥ यो देवानान्नामधा एक एव तं संप्रश्नं भुवनायंत्यन्या । विश्वत श्चक्षुरुत विश्वतो मुखो विश्वतो बाहुरुत विश्वतः पात् । सं बाहुभ्यां धमतिसंपतत्रैर्द्यावाभूमिंजनयन् देव एकः ॥ राजाधिराजाय प्रसह्य साहिने नमो वयं वैश्रवणाय कुर्महे । सम मे कामान्कामकामाय मह्यं कामेश्वरोवैश्रवणो ददातु । कुबेराय वैश्रवणाय महाराजाय नमः । पर्याप्त्या अनंतराजाय सर्वस्तो-

---

*स्नाने धूपे तथा दीपे नैवेद्ये भूषणे तथा ।
घंटानादं प्रकुर्वीत तथा नीराजनेपि च ॥

मोतिरात्र उत्तममहर्भवति । सर्वस्याप्त्यै सर्वस्य जित्यै सर्व मेव तेनाप्नोति सर्वं जयति । स्वस्ति साम्राज्यं भोज्यं स्वाराज्यं वैराज्यं पारमेष्ठ्यं राज्यं महाराज्यमाधिपत्यमयं समंतपर्यायीस्यात् सार्वभौमः सार्वायुषआंतादापरार्धात् । पृथिवी समुद्रपर्यंताया एकराळिति । तदप्येष श्लोकोभिगीतो मरुतः परिवेष्टारो मरुत्तस्या-वसन् गृहे । आवीक्षितस्य कामप्रेर्विश्वेदेवतास्सभासद इति । संसृष्टं धनमुभयं समाकृतमस्मभ्यं दत्तां वरुणश्च मन्युः । भियं दधाना हृदयेषु शत्रवः पराजितासो अपनिलयंताम् ॥ स्वस्ति मंत्रार्थास्सत्यास्संतु चतुस्सागरपर्यंतं गोब्राह्मणेभ्यः शुभं भवतु । राजा धार्मिको भवतु ॥ सर्वे जनास्सुखिनो भवंतु ॥ विश्वात्मक-श्रीभवानीशंकराय नमः ॥ मंत्रपुष्पांजलिं समर्पयामि ॥ इति पुष्पांजलिं समर्प्य ॥ यानि कानि च पापानि जन्मांतर कृतानि च ॥ तानि तानि विनश्यंति प्रदक्षिणं पदे पदे ॥ इति प्रदक्षिणां समर्पयामि ॥ अन्यथा शरणं नास्ति त्वमेव शरणं मम ॥ तस्मात् कारुण्यभावेन रक्षस्व परमेश्वर ॥ स्वस्ति प्रजाभ्यः परिपालयंतां न्यायेन मार्गेण महीं महीशाः ॥ गोब्राह्मणेभ्यः शुभमस्तु नित्यं लोकास्समस्तास्सुखिनो भवंतु ॥ काले वर्षतु पर्जन्यः पृथिवी सस्यशालिनी ॥ देशोयं क्षोभरहितो ब्राह्मणाः संतु निर्भयाः ॥ इति प्रार्थनां समर्पयामि ॥ नमोस्त्वनं-ताय सहस्रमूर्तये सहस्रपादाक्षिशिरोरुबाहवे ॥ सहस्रनाम्ने पुरुषाय शाश्वते सहस्रकोटियुगधारिणे नमः ॥ नमस्कारान् समर्पयामि ॥ ऋणं रोगश्च दारिद्र्यं पापक्षुदपमृत्यवः ॥ भयं शोकमन-

स्तापं नश्यंतु मम सर्वदा ॥ प्रसन्नार्घ्यं समर्पयामि ॥ छत्रचामरव्यजन दर्पणादि राजोपचारान् समर्पयामि ॥ ध्यानावाहनमासनार्घ्यकमिदं स्नानांशुकं भूषणम् ॥ गंधं चाक्षतपुष्पधूपममलं ज्योतींश्च नैवेद्यकम् ॥ तांबूलार्घ्यक च्छत्रचामरमिदं रत्नोज्वलं दर्पणम् ॥ मायूरव्यजनं प्रदक्षिणनमस्कारं गृहाण प्रभो ॥ ॐ अयं मे हस्तो भगवानयं मे भगवत्तरः ॥ अयं मे विश्वभेषजोयंशिवाभिमर्शनः ॥ अयं मातायं पितायं जीवातुरागमत् ॥ इदं तव प्रसर्पणं सुबंधवे हि निरिहि ॥ इत्यभिवाद्य ॥ मंत्रहीनं क्रियाहीनं भक्तिहीनं सुरेश्वर ॥ यत्पूजितं मया देव परिपूर्णं तदस्तु मे ॥ इति न्यूनातिरिक्तपरिपूर्णतार्थं देवं प्रार्थ्य अनेन मया कृत यथाकालयथासंपादितद्रव्यजातेन महापूजाराधनेन भगवान् विश्वात्मकः श्रीपरमेश्वरः प्रीयताम् ॥ इति पूजां समर्प्य ॥ यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु ॥ न्यूनं संपूर्णतां याति सद्यो वंदे तमच्युतम् ॥ ॐ अच्युताय नमः ॥ ॐ अनंताय नमः ॥ ॐ गोविंदाय नमः ॥ ॐ नमो विष्णवे नमो विष्णवे नमो विष्णवे ॥ तीर्थप्रसादं गृह्णीयात् ॥

॥ इति देवतार्चनविधिः ॥

ॐ

# अथ ब्रह्मयज्ञः

[ दर्भासने कुशपाणिः प्राङ्मुखोपविश्य ]

आचम्य, प्राणानायम्य, देशकालौ स्मृत्वा, अस्मदुभयकुल समस्तपितृणां निरतिशयानंदब्रह्मलोकावाप्तये आत्मनो देवर्ष्याचार्यपितृतृप्तिद्वारा श्रीपरमेश्वरप्रीतये ब्रह्मयज्ञाख्यं कर्मकरिष्ये ॥

विद्युदसीति मंत्रस्य अग्नि ऋषिः वरुणो देवता उदकोप स्पर्शने विनियोगः ॥ ॐ विद्युदसि विद्य मे पाप्मानमृतात्सत्यमुपैमि ॥

इत्यप उपस्पृश्य, वामजानूपरि दक्षिणपादं निधाय, दक्षिण जानुनि, निर्माल्यदर्भसहितं ब्रह्मांजलिं कृत्वा, ब्रह्मयज्ञपूर्वभागिनीं गायत्रीं सप्रणवां सव्याहृतिकां पच्छः अर्धर्चशः ऋक्शः जपं कुर्यात् ॥

प्रणवस्य परब्रह्म ऋषिः परमात्मा देवता दैवी गायत्री छंदः ॥ व्याहृतीनां विश्वामित्रजमदग्निभरद्वाजभृगव ऋषयः ॥ अग्निवायुसूर्यप्रजापतयो देवताः ॥ गायत्र्युष्णिगनुष्टुब्बृहत्यः च्छंदांसि ॥ गायत्र्या गाथिनो विश्वामित्रस्सविता गायत्री ॥ अग्निमीळ इत्यादीनां छंदसां मधुच्छंदादय ऋषयः ॥ अग्न्यादयो देवताः ॥ गायत्र्यादीनि च्छंदांसि ॥ ब्रह्मयज्ञे विनियोगः ॥

ॐ भूर्भुवःस्वः ॥ ॐ तत्सवितुर्वरेण्यं० ॥ इति पादशः, अर्धर्चशः, ऋक्शः जपेत् ॥

ॐ अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम् ॥ होतारं रत्नधातमम् ॥ अग्निः पूर्वेभिर्ऋषिभिरीड्यो नूतनैरुत ॥ स देवाँ

एह वक्षति ॥ अग्निना रयिमश्नवत्पोषमेव दिवे दिवे ॥ यशसं वीरवत्तमम् ॥ अग्नेयं यज्ञमध्वरं विश्वतः परिभूरसि ॥ सइद्देवेषु गच्छति ॥ अग्निर्होता कविक्रतुः सत्यश्चित्रश्रवस्तमः ॥ देवो देवेभिरागमत् ॥ १ ॥ यदङ्गदाशुषेत्वमग्ने भद्रं करिष्यसि ॥ तवेत्तत्सत्यमंगिरः ॥ उपत्वाग्ने दिवे दिवे दोषावस्तर्धियावयम् ॥ नमोभरन्त एमसि ॥ राजंतमध्वराणां गोपामृतस्य दीदिविम् ॥ वर्धमानं स्वेदमे ॥ सनः पितेव सूनवेग्ने सूपायनो भव ॥ स चं स्वानः स्वस्तये ॥ २ ॥ वायवायाहि दर्शत० ॥ अग्निर्वै देवाना मवमो विष्णुः परमः ॥ अथ महाव्रतम् ॥ एष पंथा एतत्कर्म ॥ अथातः संहिताया उपनिषत् ॥ विदा मघवन्विदा ॥ महाव्रतस्य पंचविंशति सामिधेन्यः ॥ ॐ इषे त्वोर्जे त्वा वायवस्थो पायवस्थ देवोवः सविता प्रार्पयतु श्रेष्ठतमाय कर्मण आप्यायध्वमघ्निया देवभागमूर्जस्वतीः पयस्वतीः प्रजावतीरनमीवा अयक्ष्मा मा वस्तेन ईशतमाघशंसो रुद्रस्यहेतिःपरिवो वृणक्तुध्रुवाअस्मिन्गोपतौ स्यात बह्वीर्यजमानस्य पशून्पाहि ॥ १ ॥ ॐ अग्नआयाहि वीतये गृणानो हव्यदातये ॥ निहोता सत्सि बर्हिषि ॥ २ ॥ ॐ शंन्नो देवीरभिष्टय आपोभवंतु पीतये ॥ शंयोरभिस्रवंतु नः ॥ ३ ॥ अथैतस्य समाम्नायस्य ॥ समाम्नायः समाम्नातः ॥ म य र स त ज भ न ल ग समितं ॥ गौः ग्माः ॥ पंचसंवत्सरमयम् ॥

अथ शिक्षां प्रवक्ष्यामि ॥ वृद्धिरादैच् योगीश्वरं याज्ञवल्क्यं ॥ नारायणं नमस्कृत्य नरं चैव नरोत्तमम् ॥ देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत् ॥ अथातो धर्मजिज्ञासा ॥ अथातो ब्रह्मजिज्ञासा ॥ ॐ तच्छंयोरावृणीमहे ॥ गातुं यज्ञाय ॥ गातुं यज्ञपतये ॥ दैवीं स्वस्तिरस्तु नः ॥ स्वस्तिर्मानुषेभ्यः ॥ ऊर्ध्वं जिगातु भेषजम् ॥ शंनो अस्तु द्विपदे ॥ शं चतुष्पदे ॥ ॐ नमो ब्रह्मणे नमो अस्त्वग्नये नमः पृथिव्यै नम ओष धीभ्यः ॥ नमो वाचे नमो वाचस्पतये नमो विष्णवे महते करोमि ॥ ब्रह्मभूर्भुवस्स्वरोम् ॥ ॐ शांतिः शांतिः शांतिः ॥

ॐ वृष्टिरसि वृश्चमे पाप्मानमृतात्सत्यमुपागाम् ॥

इत्यपः स्पृष्ट्वा देवतीर्थेन कुशाग्रैरेकैकांजलिं तर्पयेत् ॥

तीर्थदेवता स्तृप्यंतु ॥ प्रजापति स्तृप्यतु ॥ ब्रह्मा तृप्यतु ॥ वेदा स्तृप्यंतु ॥ देवा स्तृप्यंतु ॥ ऋषय स्तृप्यंतु ॥ सर्वाणि च्छंदांसि तृप्यंतु ॥ ॐकारः तृप्यतु ॥ वषट्कार स्तृप्यतु ॥ व्याहृतय स्तृप्यंतु ॥ सावित्री तृप्यतु ॥ यज्ञा स्तृप्यंतु ॥ द्यावा-पृथिवी तृप्येताम् ॥ अंतरिक्षं तृप्यतु ॥ अहोरात्राणि तृप्यंतु ॥ सांख्या स्तृप्यंतु ॥ सिद्धा स्तृप्यंतु ॥ समुद्रा स्तृप्यंतु ॥ नद्य स्तृप्यंतु ॥ गिरय स्तृप्यंतु ॥ क्षेत्रौषधिवनस्पतिगंधर्वाप्सरस स्तृप्यंतु ॥ नागा स्तृप्यंतु ॥ वयांसि तृप्यंतु ॥ गाव स्तृप्यंतु ॥

साध्या स्तृप्यंतु ॥ विप्रा स्तृप्यंतु ॥ यक्षा स्तृप्यंतु ॥ रक्षांसि तृप्यंतु ॥ भूतानि तृप्यंतु ॥ एव मंतानि तृप्यंतु ॥

अथ निवीती ऋषितीर्थेन कुशमध्येन द्विः प्रत्येकं तर्पयेत् ॥

शतर्चिन स्तृप्यंतु ॥ माध्यमा स्तृप्यतु ॥ गृत्समद स्तृप्यतु ॥ विश्वामित्र स्तृप्यतु ॥ वामदेव स्तृप्यतु ॥ अत्रि स्तृप्यतु ॥ भरद्वाज स्तृप्यतु ॥ वसिष्ठ स्तृप्यतु ॥ प्रगाथा स्तृप्यंतु ॥ पावमान्य स्तृप्यंतु ॥ क्षुद्रसूक्ता स्तृप्यंतु ॥ महासूक्ता स्तृप्यंतु ॥

अथ प्राचीनावीती* पितृतीर्थेन कुशमूलैस्त्रिः प्रत्येकं तर्पयेत् ॥

सुमंतु जैमिनि वैशंपायनपैलसूत्रभाष्यभारतमहाभारत-धर्माचार्या स्तृप्यंतु ॥ जानंति बाहविगार्ग्यगौतमशाकल्यबाभ्रव्य-मांडव्यमांडूकेया स्तृप्यंतु ॥ गर्गीवाचक्नवी तृप्यताम् ॥ वडवा-प्राचीथेयी तृप्येताम् ॥ सुलभा मैत्रेयी तृप्येताम् ॥ कहोळं त० कौषीतकं त० महाकौषीतकं त० पैंग्यं त० महापैंग्यं त० सुयज्ञं त० सांख्यायनं त० ऐतरेयं त० महैतरेयं त० शाकलं त० बाष्कलं त० सुजातवक्त्रं त० औदवाहिं त० महौदवाहिं त० सौजामिं त० शौनकं त० आश्वलायनं त० येचान्ये आचार्या स्ते सर्वे तृप्यंतु ॥

ततः पितृंस्तर्पयेत्प्रत्येकमंजलित्रयम् ॥

अस्मत्पितरं अमुक शर्माणं अमुकगोत्रं वसुरूपं स्वधा नमस्तर्पयामि ॥ १ ॥ पितामहं अमुकशर्माणं अमुकगोत्रं रुद्ररूपं स्व० ॥ २ ॥ प्रपितामहं अमुकशर्माणं अमुकगोत्रं आदित्यरूपं स्व० ॥ ३ ॥ अस्मत्मातरं

*प्राचीनावीती = ( अपसव्येन, जीवत्पितृकैः अंगुष्ठ पर्यन्तम् )

अमुकदां अमुकगोत्रां वसुरूपां स्व० ॥ पितामहीं, प्रपितामहीं, सापत्न मातरं, मातामहं, मातुःपितामहं, मातुःप्रपितामहं, मातामहीं, मातुःपितामहीं, मातुः प्रपितामहीं, आत्मपत्नीं, सुतं, भ्रातरं, पितृव्यं, मातुलं (सपत्नीकान्) दुहितरं, भगिनीं, पितृष्वसारं, मातृष्वसारं, (सभर्तृकाः) श्वशुरं, श्यालकं, भावुकं, गुरुं, आचार्यं, स्वामिनं, सखायं, स्वधानमस्तर्पयामि ॥

**आब्रह्मस्तंबपर्यंतं देवर्षिपितृमानवाः ॥ तृप्यंतु पितरस्सर्वे मातृमातामहादयः ॥ अतीतकुलकोटीनां सप्तद्वीपनिवासिनाम् ॥ आब्रह्मभुवनाल्लोकादिदमस्तु तिलोदकम् ॥ इति त्रिर्दद्यात् ॥ येके चास्मत्कुलेजाता अपुत्रागोत्रिणो मृताः ॥ ते गृण्हंतु मया दत्तं वस्त्रनिष्पीडनोदकम् ॥**

उपवीती वस्त्रं वामभागे निष्पीडयेत् ॥ अनेन देवर्ष्याचार्यपितृतर्पणाख्येन कर्मणा भगवाञ्छ्रीपरमेश्वरः प्रीयताम् ॥

॥ इति ब्रह्मयज्ञविधिः ॥

---

**॥ अथ वैश्वदेवप्रयोगः ॥**

---

॥ अग्नेः पश्चात्प्राङ्मुखोपविश्य ॥

**आचम्य प्राणानायम्य । देशकालौ संकीर्त्य । ममोपात्तदुरितक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं पंचसूनादोषपरिहारद्वारात्मान्नसंस्कारार्थं सायंप्रातर्वैश्वदेवौ तंत्रेण करिष्ये ॥ इति संकल्प्य ॥ जुष्टो दमूना आत्रेयो वसुश्रुतोग्निस्त्रिष्टुप् ॥ एह्यग्ने राहुगणो गौतमोऽग्निस्त्रिष्टुप् । अभ्याधाने विनियोगः ॥ ॐ जुष्टोदमूना अतिथिर्दुरोण इमंनो यज्ञमुपयाहि विद्वान् ॥ विश्वा अग्ने अभि**

युजोविहत्यां शत्रूयतामाभर भोजनानि ॥ ॐ एह्यग्न इहहोता निषीदादब्धः सुपुर एता भवानः ॥ अवतां त्वारोदसी विश्वमिन्वे यजामहे सौमनसाय देवान् ॥ इत्यक्षतैरावाह्याच्छादनं दूरीकृत्य समस्तव्याहृतीनां परमेष्ठी प्रजापतिः प्रजापतिर्बृहती । अग्निप्रतिष्ठापने विनियोगः ॥ ॐ भूर्भुवस्स्वः ॥ रुक्मनामानमग्निं प्रतिष्ठापयामीत्यग्निं प्रतिष्ठाप्य ॥ प्रोक्षितेंधनानि निक्षिप्य वेणुधमन्या प्रबोध्य ध्यायेत् ॥ चत्वारिशृंगा गौतमोवामदेवोग्निस्त्रिष्टुप् अग्निमूर्तिध्याने विनियोगः ॥ ॐ चत्वारि शृंगा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्ता सो अस्य ॥ त्रिधा बद्धो वृषभो रोरवीति महोदेवो मर्त्या आविवेश ॥ सप्तहस्तश्चतुःशृंगस्सप्तजिह्वो द्विशीर्षकः ॥ त्रिपात्प्रसन्नवदनस्सुखासीनश्शुचिस्मितः ॥ स्वाहां तु दक्षिणे पार्श्वेदेवीं वामे स्वधां तथा ॥ बिभ्रद्दक्षिणहस्तैस्तु शक्तिमन्नं स्रुचं स्रुवम् ॥ तोमरं व्यजनं वामैर्घृतपात्रं च धारयन् ॥ मेषारूढो जटाबद्धो गौरवर्णो महौजसः ॥ धूम्रध्वजो लोहिताक्षः सप्तार्चिः सर्वकामदः ॥ आत्माभिमुखमासीन एवं रूपो हुताशनः ॥ अग्ने शांडिल्यगोत्र मेषारूढ धूम्रध्वज कपिलजट वैश्वानरवरप्रद प्राङ्मुखाग्ने मम संमुखो वरदो भव ॥ एवं ध्यात्वा परिसमूहनपर्युक्षणे कृत्वा ॥ ॐ अर्चंतस्त्वा हवामहेर्चंतः समिधीमहि ॥ अग्ने अर्चंत ऊतये ॥ अग्नये नमः ध्यानाद्युपचारान् सपर्ययामि ॥ आत्मानमलंकृत्य हस्तं प्रक्षाल्य ॥ सिद्धमन्नमग्नावधिश्रित्योद गुद्वास्य प्रोक्ष्याग्नेः पश्चिमतो निधायाभिधार्य ॥ दक्षिणहस्तेन समंत्रं जुहुयात् ॥ तच्च प्रातरित्थम् ॥ ॐ सूर्याय स्वाहा ॥ सूर्या

येदं नमम ॥ एवमुत्तरत्रोद्देशत्यागो कुर्यात् ॥ ॐ प्रजापतये स्वाहा ॥ ॐ सोमाय वनस्पतये स्वाहा ॥ ॐ अग्नीषोमाभ्यां स्वाहा ॥ ॐ इंद्राग्निभ्यां स्वाहा ॥ ॐ द्यावापृथिवीभ्यां स्वाहा ॥ ॐ धन्वंतरये स्वाहा ॥ ॐ इंद्राय स्वाहा ॥ ॐ विश्वेभ्यो देवेभ्यः स्वाहा ॥ ॐ ब्रह्मणे स्वाहा ॥ सायं तु ॥ ॐ अग्नये स्वाहा ॥ अग्नय इदं नमम ॥ प्रजापतय इत्यादि ब्रह्मण इत्यंतं ॥ पूर्ववन्नवाहुतीर्जुहुयात् ॥ ॐ भूः स्वाहा अग्नय इदं न मम ॥ ॐ भुवः स्वाहा वायव इ० ॥ ॐ स्वः स्वाहा सूर्यायेदं० ॥ ॐ भूर्भुवस्स्वः स्वाहा ॥ प्रजापतय इदं० ॥ त्रिस्त्रिः परिसमूहन पर्युक्षणे कृत्वाऽग्निमलंकृत्य पंचोपचारपूजांते ॥ अग्निस्तुविश्रवस्तमं इत्यात्रेयो वस्रूयवो ग्निस्त्रिष्टुप् ॥ ॐ अग्निस्तुविश्रवस्तमंतु विब्रंह्माणमुत्तमं ॥ अतूर्तं श्रावयत्पतिं पुत्रं ददाति दाशुषे ॥ इति पुष्पांजलिंसमर्प्य विभूतिं धारयेत् ॥ मानस्तोकेति कुत्सो रुद्रो जगती ॥ विभूति ग्रहणे विनियोगः ॥ ॐ मानस्तोके तनये मानआयुषि मानो गोषु मानो अश्वेषु रीरिषः ॥ वीरान्मानो रुद्रभामितोवधीर्हविष्मंतो नमसा विधेम ते ॥ त्र्यायुषं जमदग्नेरिति ललाटे ॥ कश्यपस्य त्र्यायुषमिति कंठे ॥ अगस्त्यस्य त्र्यायुषमिति नाभौ ॥ यद्देवानां त्र्यायुषमिति दक्षिणस्कंधे ॥ तन्मे अस्तु त्र्यायुषमिति वामस्कंधे ॥ सर्वमस्तु शतायुषमिति शिरसि ॥

॥ इति तत्तन्मन्त्रैः तत्तत्स्थाने विभूतिं अनामिकांगुल्या धारयेत् ॥

ॐ चंमे स्वरंश्चमे यज्ञोपचंते नमश्चं ॥ यत्तेन्यूनं तस्मैत उपंयत्तेतिरिक्तं तस्मै ते नमः ॥ अग्नये नमः ॥ स्वरित ॥ श्रद्धां

**मेधां यशः प्रज्ञां विद्यां बुद्धिं श्रियं बलम् ॥ आयुष्यं तेज आरोग्यं देहि मे हव्यवाहन ॥ गोत्रोच्चारः ॥**

प्रमादात्कुर्वतां कर्म प्रच्यवेताध्वरेषु यत् ॥
स्मरणादेव तद्विष्णोस्संपूर्णं स्यादिति श्रुतिः ॥

**अनेन सायं प्रातर्वैश्वदेवाख्येन कर्मणा भगवान् यज्ञरूपी परमेश्वरः प्रीयताम् ॥**

॥ **इति वैश्वदेवः** ॥

ततो बहिर्गत्वा गृहांगणे जलमासिच्य, श्वचांडालपतितभूतवायसेभ्योन्नं भूमौ विकिरेत् ॥

ऐंद्रवारुणवायव्यायाम्यानैरृतिकाश्च ये ॥
ते काकाः प्रतिगृह्णंतु भूम्यां पिंड मयोज्झितम् ॥

इति बलिं विकीर्य, प्रक्षालितपाणिपाद आचम्य, गृहं प्रविश्य, गां यथामिलितोपचारैस्संपूज्य ॥

सौरभेय्यस्सर्वहिताः पवित्राः पुण्यराशयः ॥
प्रतिगृह्णंतु मे ग्रासं गावस्त्रैलोक्यमातरः ॥

इति गोग्रासं समर्प्य, ततो यथाशक्ति ब्राह्मणैः सार्धं यथाविधि भुंजीत ॥

**ॐ तत् सत्**